# श्रीतत्त्वसूत्रम्

## सद्भक्तिविनोद-ठक्कुर-विरचितम्

श्रीमाध्वगौड़ीय-सम्प्रदायैक-संरक्षक

ंस परिव्राजकाचार्य्य अष्टोत्तरशतश्री ॐ विष्णुपाद

द्भक्तिसिद्धान्तसरस्वतीगोस्वामि-

महाराज-सम्पादितम्

ता-नगर्यां १म संख्यक उल्टाडिङ्गि जंसन् रोड्स्थित

श्रीगौड़ीयमठतः

यिकपत्र-गौड़ीय-सम्पादकेन बि, ए, इत्युपाधिक

श्रीसुन्दरानन्द-विद्याविनोदेन प्रकाशितम्

संस्करणम् ]        [ भैक्ष्यमानकचतुष्टयम्

कलिकाता-नगर्य्यां २४३।२ संख्यक अपार सार्कितलार
रोड्स्थित गौड़ीय प्रिण्टिं ओयार्क्साख्य वैद्युतिक-
मुद्रायन्त्रे श्रीअनन्तवासुदेव-ब्रह्मचारिणा मुद्रितम्

# सूचीपत्रम्


| | विषयाः | | पृष्ठायाम् |
|---|---|---|---|
| १ । | तत्त्वप्रकरणम्... | ... | १—१५ |
| २ । | चित्पदार्थप्रकरणम् | ... | १५—२८ |
| ३ । | अचित्पदार्थप्रकरणम् | ... | २९—४४ |
| ४ । | सम्बन्धप्रकरणम् | ... | ४५—६६ |
| ५ । | सिद्धान्तप्रकरणम् | ... | ६७—९२ |

श्रीश्रीगौरचन्द्राय नमः

# श्रौतसूत्रम्

## तत्त्वप्रकरणम्

सच्चिदानन्दसान्द्रात्मा सारग्राहिजनप्रियः ।
दीनकारुण्यपूराब्धिर्जीयान्मदनमोहनः ॥
तत्कृपामृतविन्दूद्यत्पिपासस्तोकिताशयः ।
प्राचीनतत्त्वसूत्राणि विवृणोमि यथामति ॥
प्रणम्य कृष्णचैतन्यं भरद्वाजं सनातनम् ।
तत्त्वसूत्रं सव्याख्यानं भाषायां विवृतं मया ॥

यथा भागवते, प्रथमस्कन्धे सूतेनोक्तं,—

वदन्ति तत्तत्त्वविदस्तत्त्वं यद्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

तथाहि यजुर्वेदीयवाजसनेयसंहितोपनिषदि सप्तम-मन्त्रः,—

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

तथाहि गीतोपनिषदि चोक्तं भगवता,—

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

तथाहि नारदपञ्चरात्रे मङ्गलाचरणे ग्रन्थकारेणोक्तं,—

ध्यायेत्तं परमं ब्रह्म परमात्मानमीश्वरम् ।
निरीहमतिनिर्लिप्तं निर्गुणं प्रकृतेः परम् ॥
सर्वेशं सर्वरूपञ्च सर्वकारणकारणम् ।
सत्यं नित्यञ्च पुरुषं पुराणं परमव्ययम् ॥

तथाहि मार्कण्डेयपुराणे चतुर्थाध्याये कथितं,—

यस्मादणुतरं नास्ति यस्मान्नास्ति बृहत्तरम् ।
येन विश्वमिदं व्याप्तमजेन जगदादिना ॥

ननु "अथातो ब्रह्मजिज्ञासा" "अथातो धर्म्मजिज्ञासेति" व्यासादिसूत्रकारैरथशब्दस्य मङ्गलसूचकस्य तत्तत्‌जिज्ञासापदस्य तत्तद्विषयकज्ञानेच्छा पुरुषेण कर्त्तव्येति पुरुषेच्छाकृत्यधीनज्ञानविषयीभूतधर्म्मब्रह्मरूपशास्त्रं प्रतिपाद्य वस्तुसूचकस्य चोपन्यासेन मङ्गलाचरणं विषयादिसूचनरूपां प्रतिज्ञाञ्च कृत्वा शास्त्रमारब्धं, तत्त्वसूत्रकारेण तु तदकृत्वा कथं शास्त्रमुदक्रान्तमितिचेन्न, अस्मिन् शास्त्रे प्रथमतः सूत्रे

परममङ्गलस्वरूप-परमेश्वरतत्त्वनिरूपणप्रस्तावेन पृथक् मङ्गलाचरणस्यानावश्यकत्वात् एतच्छास्त्रप्रतिपाद्य-प्रयोजनीभूतवस्तुनः स्वप्रकाशत्वेन स्वतःसिद्धप्रत्यय-गोचरतया च पुरुषेच्छाकृत्यधीनज्ञानविषयत्त्वाभावात् तदर्थं जिज्ञासाकर्त्तव्येति विषयसूचनद्वारा प्रतिज्ञाया अप्यनुचितत्त्वात् तदनादृत्य प्रथमतः सूत्रमारचयति,—

## एकः परो नान्यः ॥१॥

[ एक एवाद्वितीयः परमेश्वरः तदन्यः कोऽपि परो नास्तीत्यर्थः, "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्च-ने"ति श्रुतेः । ]

ननु एकस्याद्वितीयस्य परमेश्वरस्य सहायराहित्येन विश्वसृष्ट्यादिविविधकार्य्यकर्त्तृत्वं कथं घटत इत्याशङ्कां निराकरोति,—

## अगुणोऽपि सर्वशक्तिरमेयत्वात् ॥२॥

[ स च परमेश्वरः अगुणोऽपि गुणातीतोऽपि सर्व-शक्तिमान् प्रत्यक्षादिलौकिकप्रमाणागम्यत्वादित्यर्थः । "परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबल-क्रियाचेति" श्रुतेः । ]

तथाहि भागवते २य स्कन्धे २य अध्याये शुकेनोक्तं,—

भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः ।
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥

तथाच चतुर्थस्कन्धे विंशेऽध्याये,—

एकः शुद्धः स्वयं ज्योतिर्निर्गुणोसौ गुणाश्रयः ।
सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः ॥

तथाच भागवते एकादशस्कन्धे सप्तमाध्याये,—

अत्र मां मृगयन्त्यद्धा युता हेतुभिरीश्वरम् ।
गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानतः ॥

तथाहि नारदपञ्चरात्रे,—

प्रकृतेः परमिष्टञ्च सर्वेषामभिवाञ्छितम् ।
स्वेच्छामयं परं ब्रह्म पञ्चरात्राभिधं स्मृतम् ॥

ननु निर्गुणत्वेऽपि सर्वशक्तित्वमिति कथं विरुद्धधर्म्मावस्थितिरिति शङ्कां परिहरति,—

## विरुद्धसामान्यं तस्मिन्न चित्रम् ॥३॥

[ तस्मिन् परमेश्वरे विरुद्धधर्म्माणां साहचर्य्यं न चित्रं नाश्चर्य्यमित्यर्थः । "अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्ण" इति श्रुतेः । ]

तथाहि गीता, ४र्थ अः,—

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥

नन्वेवंविधविविधविरुद्धधर्म्मविशिष्टस्य कथं ज्ञेयत्वमित्यपेक्षायामाह,—

## स सच्चिदानन्दो ज्ञानागम्यो भक्तिविषयत्वात् ॥४॥

[ स च परमेश्वरः सत्यज्ञानानन्दमयविग्रहोऽवाङ्मनसगोचरो ज्ञानेनाग्राह्यः केवलं भक्तिग्राह्यत्वात् । "यद्वाचानभ्युदितं यन्मनो न मनुते" इति श्रुतेः "भक्त्याहमेकया ग्राह्य" इति स्मृतेः । ]

श्रुतौ यथा,—

ब्रह्म सच्चिदानन्दलक्षणम् ।

तथाच ब्रह्मसंहितायां,—

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥

विष्णुपुराणे सच्चिदानन्दशब्दस्य व्याख्या यथा,—

ह्लादिनीसन्धिनीसंवित् त्वय्येका सर्वसंश्रये ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥

अस्य टीका च । हे भगवन्, त्वयि भगवति ईश्वरे सर्वसंश्रये सर्वेषामाश्रयभूते एका अचिन्त्यशक्तिः ह्लादिनी, सन्धिनी, संविदिति त्रयं भवतीत्यर्थः । कथंभूते त्वयि गुणवर्जिते सत्वरजस्तमस्त्रिगुणातीते । ह्लादतापकरी सुखदुःखमयी मिश्राशक्तिर्नभवतीत्यर्थः । अतएवानन्दाख्यपरमानन्दमयी शक्तिस्त्वयि वर्त्तते इति ध्वनितम् ।

चण्डी, प्रथमाध्याये,—

तन्नात्र विस्मयः कार्य्यो योगनिद्रा जगत्पतेः ।
महामाया हरेश्चैतत् तया संमोहितं जगत् ॥
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥
तया विसृज्यते विश्वं जगदेतच्चराचरम् ।
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥

गीतायां नवमाध्याये चोक्तं भगवता,—

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥
न च मां तानि कर्म्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्म्मसु ॥

तथाहि हयशीर्षपञ्चरात्रे,—

आनन्दो द्विविधः प्रोक्तो मूर्त्तामूर्त्तप्रभेदतः ।
अमूर्त्तस्याश्रयो मूर्त्तो मूर्त्तानन्दोऽच्युतो मतः ॥
अमूर्त्तः परमात्मा च ज्ञानरूपश्च निर्गुणः ।
स्व-स्वरूपश्च कूटस्थो ब्रह्म चेति सतां मतम् ॥
अमूर्त्तमूर्त्तयोर्भेदो नास्ति तत्त्वविचारतः ।
भेदस्तु कल्पितो वेदैर्मणितत्तेजसोरिव ॥

कपिल पञ्चरात्रे च,—

द्वे ब्रह्मणी तु विज्ञेये मूर्त्तञ्चामूर्त्तमेव च ।
मूर्त्तामूर्त्तस्वभावो यः ध्येयो नारायणो विभुः ॥

हयशीर्षपञ्चरात्रे,—

या या श्रुतिर्जल्पति निर्विशेषं
सा साभिधत्ते सविशेषमेव ।
विचारयोगे सति हन्त तासां
प्रायो बलीयः सविशेषमेव ॥

ननु, परमेश्वरस्य भक्तिग्राह्यत्वे तत्त्वे ग्राह्य जगदन्तः-पातित्वं स्यादित्याशङ्कानिरसनाय पञ्चमसूत्रमारभते,—

## स च सत्यो नित्योऽनादिरनन्तो देशकालापरिच्छेदात् ॥५॥

[ स परमेश्वरः सत्यः असतः सत्ता प्रदत्वात् "सत्यं ज्ञानमानन्दं ब्रह्मे"ति श्रुतेः । "नित्योऽविनाशी" "अविनाशीवाऽरेऽयमात्मे"ति श्रुतेः । अनादिरनन्त आद्यन्तशून्यः दैशिककालिकोभयपरिच्छेदशून्यत्वात् "सभूमिं सर्वतः स्पृष्ट्वा अत्यतिष्ठ"दिति श्रुतेः "सर्व्व-मावृत्य तिष्ठती"ति स्मृतेश्च । ]

तथा भागवते,—

नैवेशितुं प्रभुर्भूम्नईश्वरो धाममानिनाम् ।
प्रवर्त्तते यत्र रजस्तमस्तयोः
सत्वञ्च मिश्रं नच कालविक्रमः ।
न यत्र माया किमुताऽपरे हरे-
रनुव्रता यत्र सुरासुरार्च्चिताः ॥

तथाच कठोपनिषदि,—

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।

अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥

नन्वेवमप्राकृतस्य कथं प्राकृतविश्वसृष्ट्यादिकर्त्तृत्वमित्याशङ्कां निराकरोति,—

## परोऽपि चिज्जड़ाभ्यां विलासी विश्वसिद्धेः ॥६॥

[ चिज्जड़ाभ्यां प्रकृतिपुरुषाभ्यां परोऽपि भगवान् प्रकृतिपुरुषसम्बन्धात्मकविश्वसृष्टिहेतोर्विलासी विविधविलासभाववान् भवतीत्यर्थः । "स ऐक्षत" "एकोऽहं बहुस्यां प्रजायेय" इति । "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुतेश्च । ]

कठे,—

यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् ।
महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥
भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥

तथाच भागवते तृतीयस्कन्धे पञ्चविंशाध्याये,—

मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ।
वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥

तथाच भागवते दशमस्कन्धे ऊनत्रिंशाध्याये,—

भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥

तथाहि श्रीचैतन्यचरितामृतधृतवचनं,—

मधुर मधुरमेतन्मङ्गलं मङ्गलानां
सकलनिगमवल्लीसत्फलं चित्स्वरूपम् ।
सकृदपि परिगीतं श्रद्धया हेलया वा
भृगुवर नरमात्रं तारयेत्कृष्णनाम ॥

परीक्षितं प्रति श्रीशुकवाक्यं,—

कथा इमास्ते कथिता महीयसां
हिताय लोकेषु यशः परेयुषाम् ।
विज्ञानवैराग्यविवक्षया विभो-
र्वचोविभूतीर्न तु पारमार्थ्यम् ॥

तथाहि गोपालतापनी श्रुतिः,—

आविर्भावा तिरोभावा स्वपदे
तिष्ठति तामसी राजसी सात्त्विकी ।
मानुषी विज्ञानघन आनन्दघन
सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति ॥

परशक्तेस्तत्त्वान्तरत्वं परिहरति,—

## तच्छक्तितस्तत्त्वाधिक्यमिति-चेन्न तदभेदात् ॥७॥

[ तस्य परमेश्वरस्य सृष्टिकर्त्तृत्वादिकं शक्त्यपेक्ष्यञ्चेच्छक्तिरपि पृथक्तत्त्वमस्तु इत्याशङ्कां परिहरति तदभेदादिति। तस्य परमेश्वरस्य ताभिः शक्तिभिः सह अभेदाच्छक्तिर्न पदार्थान्तरं "शक्तिशक्तिमतोरभेदः" इति न्यायात् नाप्यप्रमाणापेक्षा नह्यग्नेर्दाहशक्तिरग्निभिन्नत्वेनोपलभ्यते इति सर्वलोकसिद्धत्वात् तथापि "स्वाभाविकी ज्ञानबलक्रियाचे"ति श्रुतिर्वर्त्तते। ]

तथाहि विष्णुपुराणे,—

एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥

किञ्च, मार्कण्डेयपुराणे देवीमाहात्म्ये ऋषिरुवाच,—

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम्।
एवं प्रभावा सा देवी ययेदं धार्य्यते जगत् ॥
विद्या तथैव क्रियते भगवद्विष्णुमायया।
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥

तथाहि नारदपञ्चरात्रे द्वितीयरात्रे तृतीयाध्याये महादेववाक्यं,—

एक ईशः प्रथमतो द्विधारूपो बभूव सः ।
एका स्त्री विष्णुमाया या पुमानेकः स्वयं विभुः ॥
स च स्वेच्छामयः श्यामः सगुणो निर्गुणः स्वयम् ।
तां दृष्ट्वा सुन्दरीं लीलां रतिं कर्त्तुं समुद्यतः ॥

ननु, परमेश्वरस्य विश्वसृष्ट्यादिकर्तृत्वे विकारित्वं प्रसज्येतेत्याशङ्कां निरस्यति,—

## कर्त्ताप्यविकारः स्वातन्त्र्यात् ॥८॥

[ लोके यः कर्त्ता भवति स रागद्वेषादिविकारवान् भवति इति स्वकृतनियमे स्वस्य स्वतन्त्रत्वात् तादृशनियमाधीनत्वाभावात् स परमेश्वरो जगत्कर्त्तापि विकाररहितः । "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जन"मिति श्रुतेः । ]

तथा कठोपनिषदि,—

अन्यत्र धर्म्मादन्यत्राधर्म्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥

तथाच श्रीमद्भागवते दशमस्कन्धे नवमाध्याये,—

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः ॥

तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥
तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः।
द्व्यङ्गुलोनमभूत्तेन सन्दधेऽन्यच्च गोपिका ॥
यथासीत्तदपि न्यूनं तेनान्यदपि सन्दधे।
तदपि द्व्यङ्गुलं न्यूनं यद्यदादत्त बन्धनम् ॥

विश्वसृष्टिप्रलयाभ्यां तस्य बृद्धिह्रासाभावौ सूचयति,—

## सदैकरूपः पूर्णत्वात् ॥९॥

[ अनिर्वचनीय ब्रह्माण्डरचनायां विश्वप्रलयेऽपि सदा परमेश्वरस्य एकरूपत्वं बृद्धिह्रासौ न भवत इत्यर्थः। यथा नद्यादिबृद्धिहानाभ्यां समुद्रस्योपचयापचयौ न स्तः। तत्र हेतुः तस्य परमेश्वरस्य पूर्णत्वादिति "पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते" इति श्रुतेः। ]

पूर्णरूपस्य विश्वसृष्ट्यादिकर्त्तृत्वे को हेतुरित्यपेक्षायामाह,—

## कारुण्यं तत्क्रियाहेतुर्नान्यदाप्तकामत्वात् ॥१०॥

[ तस्य परमेश्वरस्य सृष्ट्यादिक्रियायां प्रवृत्ति-

हेतुःकारुण्यं करुणाविलास एव अन्यत्कारणान्तरं नास्ति आप्तकामत्वात्। जीवानां हि तत्तत्कामतया तत्तत्कर्मणि प्रवृत्तिर्भवति "आत्मनः कामाय सर्वं प्रियं भवती"ति श्रुतेः ईश्वरस्य न तथा आप्तकामत्वात्पूर्ण कामत्वादित्यर्थः "सत्यकामः सत्यसङ्कल्प" इति श्रुतेः "नानवाप्त"मिति स्मृतेश्च। ]

तथाहि भागवते तृतीयस्कन्धे सप्तमाध्याये विदुरकृतः प्रश्नः,—

ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः।
लीलया वापि युज्येरन्निर्गुणस्य गुणाः क्रियाः॥
क्रीड़ायामुद्यमोऽर्भस्य कामश्चिक्रीड़िषान्यतः।
स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः॥

श्रीमैत्रेयेणोक्तं उत्तरं,—

सेयं भगवतो माया यन्नयेन विरुध्यते।

अस्य टीका। भगवतोऽचिन्त्यशक्तेरीश्वरस्य सेयं माया नयेन तर्केण न विरुध्यत इति।

तथाहि भागवते,—

स वा इदं विश्वममोघलीलः
सृजत्यवत्यत्ति न सज्जतेऽस्मिन्।

भूतेषु चान्तर्हित आत्मतन्त्रः
षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥

तथाच श्रुतिः,—

"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्ति अभिसंविशन्ति" ।

---

# चित्पदार्थ प्रकरणम्

ननु, परमेश्वरस्य विश्वसृष्ट्यादिक्रियायां करुणायाः कारणत्वे केषु करुणा किमर्थं वा करुणा इत्यपेक्षां जीवार्थमीश्वरःसृष्ट्यादिकं करोतीति सर्व्ववेदान्तसद्भावाज्जीवस्वरूपावगमार्थं चित्पदार्थप्रकरणमारभते श्रीसूत्रकारः,—

## चेतनाः परानुगतास्तद्विधिवश्यत्वात् ॥११॥

[ अथ चेतनाश्चैतन्यविशिष्टा जीवाः बहुवचनोप-

देशात् ते च बहवः, किन्तु परस्य ईश्वरस्यानुगतास्तेन नियमितास्तदधीना इत्यर्थः तत्कृतविधिवश्यत्वात्। य आत्मनि तिष्ठन् आत्मानमन्तरोयमयतीति श्रुतेः। "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती"ति स्मृतेश्च।]

तथाहि नारदपञ्चरात्रे द्वितीयरात्रे प्रथमाध्याये सदाशिववाक्यं,—

जीवस्तत्प्रतिबिम्बश्च भोक्ता च सुखदुःखयोः।
केचित् वदन्ति तं नित्यं कारणस्य गुणेन च॥
विद्यमानात्तिरोधानं तिरोधानाच्च सम्भवः।
देहाद्देहान्तरं याति न मृत्युस्तस्य कुत्रचित्॥

तथाच भगवद्गीतायां सप्तमाध्याये,—

अपरेयमितस्त्वन्यां प्रकृतिं बिद्धिमेऽपराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥
एतद्‌योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥

तथाचोपनिषदि,—

श्वेतकेतो तत्त्वमसि।

तत्त्वमुक्तावल्यां तु,—

साक्षात्तत्त्वमसीति वेदविषये वाक्यन्तु यद्विद्यते
तस्यार्थं कुरुते स्वकीयमतविद्भेदेऽर्पयित्वा मतिम् ।
तच्छब्दोऽव्ययमेव भेदक इति त्वन्तत्र भेद्यो यतः
षष्ठिलोपमिता तमेव न हि तद्वाक्यार्थ एतादृशः ॥

किञ्च चैतन्यचन्द्रोदयनाटके धृतं सात्वतां मतं,—

"वासुदेवः परा देवता वासुदेव परात्परमात्मनः सङ्कर्षणो जीव इत्यादि जीवयति जीवं करोतीति जीवः । न तु स्वयं जीवः । स चात्मा शब्दब्रह्म परब्रह्म । ममोभे शाश्वतीतनु इति तदुक्तेः । तस्मादेव जीवसृष्टिरित्यर्थः ।"

ननु "अयमात्मा ब्रह्मे"त्यादि श्रुतिषु जीवात्मनां ब्रह्माभिन्नत्वप्रतिपादनेन कथमत्र जीवानामीश्वराधीनत्वं सूत्रकारेण निश्चितमित्याह,—

## ते चानाद्यनन्ताः परशक्तिविशेषत्वात् ॥१२॥

[ ते च जीवा अनादयोनन्ताश्च यतः परमेश्वरस्य शक्तिरूपास्तच्छक्तेराद्यन्तरहितत्वात् । "यथाग्नेर्बहवो

विष्फुलिङ्गा" इति श्रुतेः "ममैवांशो जीवलोके जीवभूत" इति स्मृतेश्च । ]

यथा नारदपञ्चरात्रे शिवेनोक्तं,—

केचिद्वदन्ति तं नित्यं कारणस्य गुणेन च ।

पुनश्च शिवेनोक्तं,—

केचिद्वदन्त्यनित्यञ्च मिथ्यैव कृत्रिमः सदा ।
प्रलीयते पुनस्तत्र प्रतिविम्बो यथा रवेः ॥

गीतायां भगवद्वाक्यं यथा,—

अपरेयमितस्त्वन्यां प्रकृतिं बिद्धि मेऽपराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥

तथा च गीयते,—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

तथा च कठोपनिषदि अष्टादशमन्त्रः,—

न जायते म्रियते वा विपश्चि-
न्नायं कुतश्चित् न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥

जीवानां परशक्तिविशेषरूपत्त्वेऽभेद एवापद्यत-इत्याशङ्कायां भेदं द्रढीकरोति,—

## चिदानन्दस्वरूपा अपि परतो भिन्ना नित्यसत्यत्वाभावात् ॥१३॥

[ ते जीवाश्चिदानन्दस्वरूपा अपि परतः परमेश्वराद्भिन्नाः तत्र हेतुः नित्यसत्यत्वाभावादिति। तत्रेयं प्रक्रिया जीवानां सत्यत्वेऽपि तेषां सत्ताप्रदः परमेश्वर एव नित्यसत्यः न तु ते तथा। "नित्यो नित्यानामिति सत्यस्य सत्यमिति परात्परमित्यादि" श्रुतेः निर्द्वन्द्वो नित्यसत्त्वस्थ इति स्मृतेश्च। ]

तथा तृतीयमुण्डके द्वितीयमन्त्रः,—

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमेति वीतशोकः॥

भेदाभेदविचारहेतुकं सम्प्रदायभेदं निरूपयति,—

## तेषां परत्वं केचिदपरे भेदमितरे तूभयम् ॥१४॥

[ तेषां जीवानां परत्वं ब्रह्मस्वरूपत्वं केचिद्बादरायणाद्याः प्रतिपादयन्ति अपरे कश्यपादयस्तु भेदं तेषां

परमेश्वरभिन्नत्वं वदन्ति। इतरे शाण्डिल्यादयः केनचिदंशेन भेदं केनचिदंशेन अभेदञ्च व्याचक्षते। तत्र यथायथं प्रमाणान्यपि दर्शितानि। अयमात्मा ब्रह्मेति द्वौ सुपर्णौ सयुजौ सखायाविति, एकधाबहुधा चैव दृश्यते जलचन्द्रवदित्यादि श्रुतयः।]

तृतीयमुण्डके,—

द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्योऽभिचाकशीति॥

कठोपनिषदि,—

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।
देहाद्विमुच्यमानस्य किमत्र परिशिष्यते॥

एतद्विषये श्रुतिः,—

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत।

तथा च मुण्डकोपनिषदि,—

प्राणो ह्येष यः सर्वभूतैर्विभाति
विजानन् विद्वान् भवते नातिवादी।
आत्मक्रीड़ आत्मरतिः क्रिया-
वानेष ब्रह्मविदां वरिष्ठः॥

नन्वेवं मतभेददर्शनेन प्राणिनां बुद्धिभ्रम एव स्यादित्याशङ्कायां सर्वेषामैकमत्यरूपं स्वमतं प्रकाशयति,—

## सर्वेषां सामञ्जस्यं सात्वतविज्ञानस्य भ्रमत्वाभावात् प्रमाणसद्भावाच्च ॥१५॥

[ सर्वेषां ऋषीणां सामञ्जस्यं ऐकमत्यमेव विचारेणाधिगम्यते तेषां सात्त्वतानां भगवत्तत्वज्ञानिनां ज्ञानस्य भ्रमत्वाभावात् अयथार्थत्वाभावात् तन्मतेषु पूर्वोक्तश्रुत्यादिप्रमाणसद्भावादपीत्यर्थः। मायां मदीयामुद्गृह्य वदतां किन्तु दुर्घटमिति श्रीभगवदुक्तेः। ]

यथा तैत्तिरीयोपनिषदि,—

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति।

एवं जीवस्वरूपं निरूप्य इदानीं सर्वानर्थनिवृत्तिपूर्वकं परमार्थफलप्राप्तये उपायं वक्तुमुपक्रमते,—

## विचाररागौ चेतनधर्मौ स्वरूपप्रवृत्तिभावात् ॥१६॥

[ विचारो हि ज्ञानजन्यः अतएव चेतननिष्ठः ज्ञानस्य

तत्स्वरूपत्वात् रागस्याप्यानन्दजन्यत्वात् आनन्दस्य निजरूपत्वात् चेतननिष्ठत्वं तत्प्रवृत्तिरूपत्वञ्च। सत्यं ज्ञानमानन्दमिति श्रुतेः। ]

यथा ब्रह्मसूत्रं,—

आत्मेति त्ववगच्छन्ति ग्राहयन्ति चेति।

किञ्च भागवते प्रह्लादोक्तं,—

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः।
अविक्रियः स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः॥

यथा विष्णुपुराणे प्रह्लादोक्तं,—

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु॥

गीतायां द्वितीयाऽध्याये,—

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोयं सनातनः॥

तथा हि भागवते दशमस्कन्धे प्रथमाध्याये वसुदेव-वाक्यं,—

स्वप्ने यथा पश्यति देहमीदृशं
मनोरथेनाभिनिविष्टचेतनः।
दृष्टश्रुताभ्यां मनसानुचिन्तयन्
प्रपद्यते तत्किमपि ह्यपस्मृतिः॥

यतो यतो धावति दैवचोदितं
मनो विकारात्मकमाप पञ्चसु ।
गुणेषु मायारचितेषु देह्यसौ
प्रपद्यमानः सह तेन जायते ॥

कठोपनिषदि —

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥
इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् ।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥

तत्र रागस्य अर्थानर्थोभयमूलत्वं प्रतिपादयति,—

## परेऽनुरक्तिः स्वाभाविकी श्रेयस्करी च इतरेष्वौपाधिकी दुःखप्रदा च ॥१७॥

[ जीवानामिति अनुवर्त्तते । परे ईश्वरे अनुरक्तिः स्वभावसिद्धा उत्कर्षादिश्रेयःसम्पादयित्री च भवति । इतरेषु वित्तापत्यकलत्रादिषु सा अनुरक्तिरौपाधिकी संसारदुःखप्रदा च भवतीत्यर्थः तमेव विदित्वाऽतिमृत्युमेति, अजो ह्येको जुषमाणोनुशेते इत्यादि श्रुतेः ]

यथा चोक्तं भगवता,—

सर्वधर्म्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

पुनश्च गीतायां भगवदुक्तिः,—

समोहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

ननु चिदानन्दरूपस्य कथमनर्थसम्बन्धइत्याशङ्कायामाह,—

## उपाधिकृता हि क्लेशाः ॥१८॥

[ जीवानां संसारोपाधिहेतुकाः क्लेशरूपा अनर्था भवन्ति। कपूयचरणाः कपूयान् योनिमापद्यन्त इत्यादि श्रुतेः बुद्धिनाशात्प्रणश्यति इत्यादि स्मृतेश्च । ]

तथा च कठोपनिषदि,—

यदा सर्वे प्रभिद्यन्ते हृदयेस्य कुग्रन्थय. ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥

तथा हि वाजसनेयोपनिषदि,—

असूर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचाऽत्महनो जनाः ॥

श्रीरूपगोस्वामिकृत भक्तिरसामृतसिन्धुग्रन्थे—

क्लेशास्तु पापं तद्बीजमविद्या चेति तत्त्रिधा ।

यथा वाजसनेयोपनिषदि—

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।

एवं जीवानां उपाधिकृतक्लेशसम्बन्धरूपं बन्धं व्यवच्छिद्य इदानीं मुक्तिस्वरूपं विशदयितुं सूत्रमारभते,—

## अनर्थनिवृत्तिर्मुक्तिः स्वपद-प्रापकत्वात् ॥१६॥

[ उपाधिकृतदुरवस्थाजनितानर्थनिवृत्तिरेव जीवानां संसारमुक्तिः स्वस्य पदं चिदानन्दस्वरूपं तत्प्राप्तिहेतुत्वात्तस्या इत्यर्थः सता सौम्य तदा सम्पन्नो भवति। आनन्दं ब्रह्मणो विद्वान्न विभेति कुतश्चन इत्यादि श्रुतेः । ]

तद्विषये शाण्डिल्यसूत्रं यथा,—

तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत् ।

कठोपनिषदि,—

एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥

अपरञ्च,—

न जायते म्रियते वा विपश्चि-
न्नायं कुतश्चिन्न बभूव कश्चित् ।

अजो नित्यः श्वाश्वतोयं पुराणो
न हन्यते हन्यमाने शरीरे ॥

पुनश्च कठोपनिषदि,—

न साम्परायः प्रतिभाति बालं
प्रमाद्यन्तं वित्तमोहेन मूढ़म् ।
अयं लोको नास्ति पर इति मानी
पुनः पुनर्वशमासाद्यते मे ॥

तथा हि कठोपनिषदि,—

नैषा तर्क्केण मतिरापनेया
प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।
यान्त्वमापः सत्यधृतिर्वतासि
त्वादृङ्नी भूयान्नचिकेतः प्रेष्ठा ॥

अतएव निम्नलिखितं साधूनां वाक्यमेव अस्माकं केतुवदाचरति,—

अचिन्त्याः खलु ये भावाः न तांस्तर्क्केण योजयेत् ।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥

तत्र व्याससूत्रं यथा,—

तर्क्काप्रतिष्ठानात् ।

तथा च श्रीमद्भागवते प्रथमस्कन्धे सूतेनोक्तं,—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि दृष्ट एवात्मनीश्वरे ॥

तथा च भागवते द्वितीयस्कन्धे मुक्तिकथनं,—

मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ।

चित्पदार्थस्तु स्वभावतः स्वतन्त्रः ईश्वरप्रसादात् । किन्तु जीवानां स्वातन्त्र्यं हि तेषां क्लेशहेतुः इति प्रसिद्धं तर्हि तद्दानेन कुतः ईश्वरप्रसादो भवतीत्याशङ्कायामाह,—

## जीवानामितरानुरक्तिहेतुरीश्वरकारुण्यं तत एव तेषां स्वातन्त्र्यसिद्धेः ॥२०॥

[ तेषां स्वातन्त्र्यं तदुत्कर्षाय ईश्वरेण करुणया दत्तम् । ततः परमेश्वरं विस्मृत्य स्वतन्त्रतया जीवा इतरविषयासक्ता भवन्तीत्यर्थः । "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि न तं विजानथ य इमा यद्युष्माकमन्तरं बभूव इत्यादि श्रुतेः । ]

तथा हि मुण्डकोपनिषदि,—

यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामां-
स्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥

तथाहि चतुर्थमुण्डके,—

कामान् यः कामयते मन्यमानः
सकामभिर्जायते तत्र तत्र ।
पर्य्याप्तकामस्य कृतात्मनस्तु
इहैव सर्वे प्रविलीयन्ति कामाः ॥

श्रीमद्भागवते दशमस्कन्धे षोड़शोऽध्याये नागपत्न्य ऊचुः,—

अनुग्रहोऽयं भवता कृतो हि नो
दण्डोऽसतां ते खलकल्मषापहः ।
यद्दन्दशूकत्त्वममुष्य देहिनः
क्रोधोऽपि तेऽनुग्रह एव सम्मतः ॥

# अचित्पदार्थप्रकरणम्

ननु परस्य निर्गुणस्य सच्चिदानन्दमयस्य विश्व-रचनादिक्षमाकारा कीदृशी वा शक्तिरित्यपेक्षायामचित्पदार्थप्रकरणमारभते सूत्रकारः,—

## मायाशक्तिरचिद्गुणवती परावरकार्य्यरूपा च ॥२१॥

[ तत्र मायानाम पारमेश्वरी शक्तिः मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरमिति श्रुतेः । सा तु अचिच्चित्पदार्थौ जीवेश्वरौ तद्भिन्ना सत्वादिगुण-विशिष्टा । परावरकार्यरूपा परममहत्परिमाणं अवरं निकृष्टपरिमाणं यत्कार्यं तद्रूपेण परिणता भवति । तैत्तिरीयोपनिषदि अजास्वरूपमुक्त्वा तदितरत्व-मीश्वरस्य दर्शितम् ।

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः ॥ ]

वेदान्तसूत्रस्य गोविन्दभाष्ये,—

प्रलयेऽतिसौक्ष्म्याद्विभागानर्हानुभूतसत्त्वादिगुणा तमःशब्दिता मूलप्रकृतिरजेत्युच्यते सृष्टिकालेतूद्भूत-सत्त्वादि-गुणाविभक्तनामरूपा प्रधानाव्यक्तादिशब्दिता लोहिताद्याकारा ज्योतिरुत्पन्नेति। महानव्यक्ते लीयतेऽव्यक्तमक्षरेऽक्षरं तमसीति श्रुतेः ॥

यथा वाजसनेयोपनिषदि,—

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।

यथा सांख्यकारिकायां पुरुषलक्षणे,—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोड़शकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

तथा च ब्रह्माणं प्रति भगवद्वाक्यं ( भागवते २य स्कन्धे ६म अध्याये ४ श्लोके ),—

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥

तथा हि शाण्डिल्यसूत्रं,—

तच्छक्तिर्माया जड़सामान्यात्।

तथा च भगवद्गीतायां,—

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्त्तते ॥

तथाहि गीतायां,—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

कणादसूत्रं चतुर्थ अध्याये द्वितीय आह्निके,—

"सदकारणवन्नित्यम्"

तत्र वैशेषिकसूत्रोपस्कारे,—

निरवयवं द्रव्यमवधिः स एव परमाणुः ।

यथा भागवते श्रीमैत्रेयेणोक्तं,—

चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥
स्वतएव पदार्थस्य स्वरूपावस्थितस्य यत् ।
कैवल्यं परममहान्न विशेषो निरन्तरः ॥

श्रीभगवदुक्तिर्यथा,—

मायां मदीयामुद्गृह्य वदतां किन्नु दूर्घटम् ।

ननु तादृशी शक्तिः स्वयमेव स्वतन्त्रतया जगत् कर्त्री भवतु किं परापेक्षयेत्यत आह,—

## जड़त्वात्कृतिशून्या चेतनप्रेरिता भवति सञ्ज्ञावत् ॥२२॥

[ अतएव चेतनभिन्नत्वेन जड़त्वात्कृतिशून्या किञ्चि-

दपि कर्त्तुमयोग्या किन्तु चेतनेन प्रेरिता प्रवर्त्तिता सती अग्न्युत्तप्तसञ्जाववत् चेष्टते जगत्कर्त्री भवतीत्यर्थः। मयाध्यक्षेणप्रकृतिः सूयते सचराचरमिति श्रीभगवद्वचनात्। ]

तथाच श्रुतौ,—

स ऐक्षत इमाल्लोकानसृजत।

तथा हि गीतायां,—

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्व्विधम्॥

तथा च भागवते तृतीयस्कन्धे कपिलोनोक्तं,—

दैवात्क्षुभितधर्म्मिण्यां स्वस्यां योनौ परः पुमान्।
आधत्त वीर्यं साऽसूत महत्तत्त्वं हिरण्मयम्॥

सांख्याचार्य्यास्त्वाहुः,—

प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः।

भागवते तृतीयस्कन्धे कपिलवाक्यं तु,—

प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवी।
चेष्टा यतः स भगवान्काल इत्युपलक्षितः॥

यथा मार्कण्डेयपुराणे चण्डीमाहात्म्ये प्रकृतिं प्रति ब्रह्मवाक्यं,—

त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत्।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा॥

मायाशक्तेश्चेतनानां बन्धरूपत्वं दर्शयति,—

## सा परानुरक्तानां कारावद्देहादिबन्धनरूपा ॥२३॥

[ सा प्रकृतिः परे परमेश्वरे अननुरक्तानां अनुरागशून्यानां स्वतन्त्रस्वभावात् तत्कृताज्ञालङ्घनपराणां देहादिबन्धनरूपा भवति। योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येनुसंयन्ति यथाकर्म्म यथाश्रुतमिति श्रुतेः। ]

तथा कठोपनिषदि,—

पुरमेकादशद्वारमजस्यावक्रचेतसः।

तथा गीतायां,—

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥

अतएव गीतायां श्रूयते—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥

कठोपनिषदि,—

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।
देहाद्विमुच्यमानस्य किमत्र परिशिष्यते॥

अतएव भागवते तृतीयस्कन्धे कपिलवाक्यं,—

अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ।
यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥

## अनादिरनन्ता च परमेश्वर-शक्तित्वात् ॥२४॥

[ सा प्रकृतिरनादिरनन्ता च परमेश्वरस्य शक्तिविशेषत्वात्प्रकृतिं पुरुषञ्चैव विद्ध्यनादीह्यु भावपीति स्मृतेः । ]

तथा हि भागवते प्रथमस्कन्धे प्रथमेऽध्याये प्रथमः श्लोकः,—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजो वारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

तस्या अनाद्यनन्ताया अपि औपाधिकीं देशकालावस्थां निरूपयति सूत्रद्वयेन,—

## कालोनार्थान्तरम्बद्धानां प्रकृतिसम्बन्धरूपत्वात् ॥२५॥

[ कालस्य पृथक्पदार्थत्वं केचिन्मन्यन्ते यथा प्रकृतेः कालरूपत्वे प्रमाणं मार्कण्डेयपुराणवचनम्। कला-काष्ठादिरूपेण परिणामप्रदायिनि। तन्मतं निराकरोति। कालो नाम न पदार्थविशेषः किन्तु सम्बन्धमात्रम्। ]

चिदचितोर्न तृतीयम्।

श्रीमद्भागवते तृतीयस्कन्धे कपिलेनोक्तं,—

प्रभावं पौरुषं प्राहुः कालमेके यतोभयम्।
अहङ्कारविमूढस्य कर्त्तुः प्रकृतिमीयुषः॥

## सैवाधिष्ठानरूपिणी देशसंज्ञिता॥२६

[ सैव प्रकृतिः जीवानां अधिष्ठानभूता आधार-रूपिणी देशसंज्ञिता भवति। समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेः। वृक्षोऽत्र प्रकृतिमय आधारः। ]

अनेके पृथिव्या आधारत्वे इमं वेदं प्रमाणयन्ति,—

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥

पूर्वमन्त्रेषु कथयन्ति,—

दिव्यो ह्यमूर्त्तः पुरुषः स वाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः।

मार्कण्डेये,—

आधारभूता जगतस्त्वमेकेत्यादि ।

तया बद्धानां चेतनानामपि भ्रमबाहुल्यं दर्शयति —

## जड़े बद्धस्यानन्दभ्रमो वैकुण्ठ-भ्रमश्चासङ्गात् ॥२७॥

[ बद्धजीवानां जड़पदार्थे देहादौ स्वर्गे च आनन्दः सुखमिति बुद्धिर्भ्रमएव आसङ्गात् आसक्तिहेतोर्भवति । जड़े प्राकृतवस्तुविशेषे भगवल्लोक इति श्रीभगवानिति भ्रमोपि आसङ्गात् भवति । तथा हि रजोधिका कर्म्मपरा दुःखे च सुखमानिन इति श्रीभगवदुक्तिः । ]

यथा कठोपनिषदि,—

स्वर्गे लोके न भयं किञ्चनास्ति
न तत्र त्वं न जरया बिभेति ।
उभेतीर्त्वा अशनायापिपासे
शोकातिगो मोदते स्वर्गलोके ॥

अतएव कठोपनिषदि नचिकेतसोक्तं,—

श्वोऽभावामर्त्यस्य यदन्तकैतत्
सर्वेन्द्रियाणां जरयन्ति तेजः ।

अपि सर्वं जीवितमल्पमेव
तवैव बाहास्तव नृत्यगीतम् ॥

पुनश्च मुण्डकोपनिषदि,—

परीक्ष्यलोकान् कर्म्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥

इष्टापूर्त्तं मन्यमाना वरिष्ठं
नान्यच्छ्रेयो वेदयन्ते प्रमूढ़ाः ।
नाकस्य पृष्ठेते सुकृतेऽनुभूत्वा
इमं लोकं हीनतरं वा विशन्ति ॥

तथा हि गीतायां द्वितीयाध्याये,—

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

श्रीमच्छङ्कराचार्यभाष्यं,—

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम् ।

यथा गीतायां भगवदुक्तिः,—

जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

यथा गीतायां १५ अध्याये,—

अश्वत्थमेनं सुविरूढ़मूल-
मसङ्गशस्त्रेण दृढ़ेन छित्त्वा ।
ततः पदं तत्परिमार्गितव्यं
यस्मिन् गता न निवर्त्तन्ति भूयः ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम ॥

इदानीमुक्तभ्रमनिवृत्तिसाधनं दर्शयति,—

## विवेकेन ततो विमुक्तिः ॥२८॥

ततः पूर्वोक्तादुभयविधभ्रमाज्जीवानां विमुक्ति-र्विवेकात् जीवात्मपरमात्मनोस्तत्त्वविचारात् भवति। तथा च श्रुतिः आत्मानञ्चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसज्जते। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे। ]

अधुना भगवद्गीतावाक्येन विवेकप्रणाली कथ्यते.—

श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्म्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥
श्रद्धावान् लभते ज्ञानं मत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वापरां शान्तिमचिरेणाधिगच्छति ॥

यथा गीतायां,—

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामःक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥
चतुर्व्विधाभजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

तथा च भागवते प्रथमस्कन्धे कुन्तीवाक्यं,—

विपदः सन्तु ताः शश्वत्तत्र तत्र जगत्पते ।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥

तथा नारदपञ्चरात्रे द्वितीयरात्रे द्वितीयाध्याये.—

श्रीकृष्णभक्तसङ्गेन भक्तिर्भवति नैष्ठिकी ।
अनिमित्ता च सुखदा हरिदास्यप्रदा शुभा ॥
यथा वृक्षलतानाञ्च नवीनः कोमलांकुरः ।
वर्द्धते मेघवर्षेण शुष्कः सूर्यकरेण च ॥

तथैव भक्तालापेन भक्तिवृक्षनवांकुरः ।
बर्द्धते शुष्कतां याति चाभक्तालापमात्रतः ॥

यथा गीतायां,—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥

यथा गीतायां,—

मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

तथा हि गीतायां, —

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

## न च प्राकृतवदिन्द्रियग्राह्यत्वं वैकुण्ठस्याधोक्षजत्वात् ॥२९॥

[ ननु वैकुण्ठं तदधिष्ठानं द्रष्टुन्ते मुनयो गता- इत्यादौ अनेकदेवर्षिब्रह्मर्षिप्रभृतीनां वैकुण्ठलोकगमनं श्रीभगवद्दर्शनं पुनः प्रत्यागमनादिकं वर्णितमस्ति कथमुच्यते अज्ञानजन्य एष भ्रम इत्याशङ्कां निराकर्त्तु- मुनत्रिंशसूत्रमारब्धवान् श्रीसूत्रकारः न चेति । न च प्राकृतघटपटादिविषयवत् इन्द्रियगोचरत्वं वैकुण्ठस्य

भगवल्लोकस्य भगवतो वा भवति अधोक्षजत्वात् तस्य अतीन्द्रियत्वात् इत्यर्थः। तत्र ह इन्द्रियगोचरत्वेन वर्णितास्तत्त्वं वैकुण्ठादयस्तु मायाकल्पितवैकुण्ठ-पराः वैकुण्ठः कल्पितो येन लोकोलोकनमस्कृत इति स्मरणात्। अन्यथा पुनः प्रत्यागमनं न स्यात्स्याच्चेत् यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम, मामुपेत्य तु-कौन्तेय पुनर्जन्म न विद्यते इति श्रीमुखोक्तिरप्यन्यथा स्यात्। यतो वाचो निवर्त्तन्ते इति श्रुतिश्च। ]

यथा,—

तत्र सत्त्वं निर्म्मलत्वात्प्रकाशकमनामयम्।

तत्र प्रमाणं,—

वैकुण्ठःकल्पितो येन लोकोलोकनमस्कृतः।

यथा नारदपञ्चरात्रे सदाशिववाक्यं,—

गोलोको नित्यवैकुण्ठो यथाकाशो यथा दिशः।

तथाहि श्रीमद्भागवते द्वितीयस्कन्धे ब्रह्मणो वैकुण्ठ-दर्शनं वर्णितं,—

तस्मै स्वलोकं भगवान् सभाजितः
सन्दर्शयामास परं न यत्पदम्।
व्यपेतसंक्लेशविमोहसाध्वसं
स्वदृष्टवद्भिः पुरुषैरभिष्टुतम्॥

प्रवर्त्तते यत्र रजस्तमस्तयोः
सत्वञ्च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरे
रनुव्रता यत्र सुरासुरार्च्चिताः ॥
तद्दर्शनाह्लादपरिप्लुतान्तरो
हृष्यत्तनुः प्रेमभराश्रुलोचनः ।
ननाम पादाम्बुजमस्य विश्वसृग्
यत्पारमहंस्येन पथाधिगम्यते ॥

तत्रैव दशमस्कन्धे ब्रह्ममोहापनोदने ब्रह्मस्तोत्रे द्वितीयश्लोकः,—

अस्यापिदेववपुषो मदनुग्रहस्य
स्वेच्छामयस्य नतु भूतमयस्य कोऽपि ।
नेशे महि त्ववसितुं मनसान्तरेण
साक्षात्तवैव किमूतात्मसुखानुभूतेः ॥

यथा मुण्डकोपनिषदि,—

हिरण्मये परेकोशे विरजं ब्रह्मनिष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदोविदुः ॥

यथा चैतन्यप्रभुधृत भागवतवचनं —

वदन्ति तत्तत्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्यते ॥

नारदपञ्चरात्रे, –

ज्योतिरभ्यन्तरेरूपमतुलं श्यामसुन्दरम् ।

ब्रह्मसंहितायां, —

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥

अतएव वेदे,—

सपर्य्यगाच्छुक्रमकायमव्रण
मस्नाविरं शुद्धमपापविद्धम् ।
कविर्म्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीयभ्यः समाभ्यः ॥

ब्रह्माण्डपुराणे राधाहृदये देवस्तुतिः,—

सदेव सौम्येदमग्र आसीन्माध्यन्दिनो जगुः ।
त्वं हि तत्परमं ब्रह्म तुभ्यं नित्यं नमो नमः ॥
द्वे विद्ये वेदितव्ये च शब्दब्रह्म परञ्च यत् ।
तत् त्वंहि शब्द परमं ब्रह्म तस्मै नता वयम् ॥
एकमेवाद्वितीयं यद्बृहदारण्यकोऽब्रवीत् ।
तदेकं ब्रह्म त्वं देव तस्मै नित्यं नमो नमः ॥
एको वै पुरुषो यो हि नित्यं सदसदात्मकम् ।
श्रुतिद्वयस्य विषयं त्वां नौमि पुरुषोऽव्ययम् ॥

अप्राकृतस्य वैकुण्ठस्य पूर्वोक्तमधोक्षजत्वं स्थिरीकर्त्तुमिन्द्रियादीनां प्राकृतत्वं प्रकटयति,—

## इन्द्रियाणि तद्विषयास्तज्जातभावाश्च मनसा सह प्राकृताश्चिदुपाधित्वाज्जन्यत्वाच्च ॥३०॥

[ इन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च तेषां विषयारूपरसादयः विषयपदमुपलक्षणं कर्मेन्द्रियविहितगत्यादिक्रियाश्च तज्जातभावा विषयेन्द्रियसम्बन्धजनितमानसविकाराश्च मनसा सह सङ्कल्पविकल्पात्मकं मनोऽपि सर्वे एव एते पदार्थाः प्राकृताः प्रकृतिसम्बन्धिन एव चिदुपाधित्वात् यतश्चित्पदार्थोपाधय एते जन्यत्वाच्च सृज्यकार्य्यवर्गत्वात् । एवमेतस्मादात्मनः सर्व्वे प्राणाः सर्व्वेन्द्रियाणीति तन्मनोऽसृजत इत्यादि श्रुतेश्च । ]

कठोपनिषदि,—

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥

# सम्बन्धप्रकरणम्

अथ चित्प्रकरणनिर्णीतानां जीवानां सच्चिदानन्द-पूर्णपरमेश्वरप्राप्त्युपायप्रदर्शनाय स्वतःसिद्धसम्बन्ध-द्योतकं चतुर्थप्रकरणमारभते तत्र भक्तेः सिद्धान्त लक्षणमाह,—

## भक्तिः पूर्णानुरक्तिः परे ॥३१॥

[ परे परमेश्वरे पूर्णा अव्यवच्छिन्ना अखण्डिता अनुरक्तिरेव भक्तिरितिभक्तेर्लक्षणं रसो ह्येवैष रसं लब्ध्वानन्दी भवतीति श्रुतेः ।

नत्वा प्रभुपदाम्भोजं प्रेमानन्दप्रकम्पितः ।
सञ्चिनोमि प्रयत्नेन विन्दून् भक्तिसुधाम्बुधेः ॥
नित्यानन्दमहं नौमि तथा सीतापतिं प्रभुम् ।
हरिदासं वैष्णवाग्र्यं पण्डितञ्च गदाधरम् ॥
श्रीरूपं तद्भ्रातरञ्च बन्दे भक्तान् महाजनान् ।
येषां कृपाजलोत्सिक्ता श्रीकृष्णकरुणालता ॥
नरोत्तमादीन् बन्देऽहं प्रेमभक्तिप्रवर्त्तकान् ।
सार्व्वभौमं स्वरूपञ्च गोविन्दादीन् प्रभोः प्रियान् ॥
बाल्मीकिञ्च वशिष्ठञ्च नारदं देवदर्शनम् ।
व्यासं वैयासकिं सूतं भवं प्रह्लादमुद्धवम् ॥

सनकादीन् शौनकादीन् विष्णुरातं महोदयम् ।
भीष्मञ्च कपिलं देवं ध्रुवं प्राचीनवर्हिषम् ॥
अम्बरीषं महात्मानं नव योगेश्वरांस्तथा ।
सर्वान् भागवतान् बन्दे प्राचीनान् भक्तिकोविदान् ॥
एतेषां विश्वमान्यानामंघ्रिरेणुप्रसादतः ।
मम मन्दमतेरस्तु भक्तिव्याख्यानदक्षता ॥ ]

तथा हि तलवकारोपनिषदि,—

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स यत्र तदेवं वेदाभि हैनं सर्वादि भूतानि संवाञ्छन्ति ॥

तथा च नारद पञ्चरात्रे,—

सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्म्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥

तथा हि भागवते तृतीयस्कन्धे,—

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।

तथा च तत्रैव,—

देवानां गुणलिङ्गानामानुश्रविककर्म्मणाम् ।
सत्व एवैक मनसो वृत्तिः स्वाभाविकी तु या ।
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥

तथा च भक्तिरसामृतसिन्धौ श्रीमद्रूपगोस्वामि-वाक्यं,—

अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥

तथा च शाण्डिल्यसूत्रं,—

सा परानुरक्तिरीश्वरे ॥

एवं लक्षितायाः परभक्तेः सर्वत्रानुपलब्धेरधिकारि-भेदेन भक्तिभेदं निरूपयति,—

## तस्याः स्वरूपं फलमुपायश्चेति ॥३२

[ जीवानां मुक्तबद्धावस्था-भेदादधिकारभेदेन भक्ति-स्वरूपं द्विविधं फलभक्तिरुपायभक्तिश्चेति तत्र मुक्त-जीवेषु फलभूता भक्तिः सिद्धिरूपा प्रेमभक्तिर्मुख्या बद्धजीवेषु उपायभक्तिस्तु भक्त्युपायभूतसाधनरूपा किन्तु आयुर्घृतमित्यादौ आयूस्कारणे घृते आयुस्तादा-त्म्यमिव भक्तिसाधनेषु भक्तिरिति व्यपदेशो गौण एव यथा सततं कीर्त्तयन्तो मां जपन्तश्च दृढ़व्रताः । नम-स्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते इत्यादौ कीर्त्तन जपनमस्कारादीनां भक्तिसाधनत्वकथनात् भक्तेः पृथ-क्त्वं प्रतिपादितमिति । ]

गीतायां,—

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

तथा हि नारदपञ्चरात्रे नैष्ठिकीभक्तिकथने सदाशिवेनोक्तं,—

अनिमित्ता च सुखदा हरिदास्यप्रदा शुभा ।

इदानीं परभक्तेरनन्यपेक्षितां दर्शयति,—

## फलभक्ते नान्यदङ्गमेकत्वात् स्वतःसिद्धत्वाच्च ॥३३॥

[ फलभक्तेरन्याङ्गापेक्षा नास्ति एकत्वात् अद्वितीयत्वात् रागवृत्तित्वेन स्वतःसिद्धत्वाच्च न साधनापेक्षेत्यर्थः । नित्यसिद्धस्य भावस्य प्राकट्यं हृदिसाध्यतेति भक्तिसिद्धान्ते दर्शनात् आनन्दं ब्रह्मणोरूपमिति श्रुतेश्च ]

तथाहि भक्तिरसामृतसिन्धौ रूपगोस्वामिवाक्यं,—

सम्मतं भक्तिविज्ञानां भक्त्यङ्गत्वं न कर्म्मणाम् ।
ज्ञानवैराग्ययोर्भक्तिप्रवेशायोपयोगिता ॥
ईषत्प्रथममेवेति नाङ्गत्वमुचितं तयोः ।
यदुभे चित्तकाठिन्यहेतुप्राये सतां मते ।
सुकुमारस्वभावेयं भक्तिस्तद्धेतुरीरिता ॥

तथाहि भागवते,—

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥

भागवते प्रथमस्कन्धे सूतेनोक्तं,—

यदनुध्यासिना युक्ताः कर्म्मग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदस्तस्य को न कुर्यात्कथारतिम् ॥

भागवते,—

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥

अतएव गोपीगीतायां गोपिका वचनं,—

सुरतवर्द्धनं शोकनाशनं
स्वरितवेणुना सुष्ठुचुम्बितम् ।
इतररागविस्मारणं नृणां
वितर वीर नस्तेऽधरामृतम् ॥

किन्तु एवं परभक्तिं निरूप्य उपायभक्तिं निरूपयितुमारभते,—

## उपायभक्तेः परानुशीलनं प्रत्याहारश्चाङ्गम् ॥३४॥

[ परानुशीलनं परस्य ईश्वरस्य अनुशीलनं आनुकूल्येन अनुचिन्तनं प्रत्याहारः इन्द्रियजयादिरूपं वैराग्यञ्च उपायभक्तेः अङ्गं साधनमित्यर्थः। "मन्मना भवमद्भक्तो मद्याजी मां नमस्कुरु" इति भगवदुपदेशात्। ]

भागवते,—

मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः।

भक्तिरसामृतसिन्धौ,—

क्षुद्रकौतूहलमयी चञ्चला दुःखहारिणी।
रतेश्छाया भवेत्किञ्चित्तत्सादृश्यावलम्बिनी॥

भागवते,—

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया॥

रूपगोस्वामिवाक्यं,—

किन्तु ज्ञानविरक्त्यादि साध्यं भक्त्यैव सिद्ध्यति।
रुचिमुद्वहतस्तत्र जनस्य भजने हरेः।
विषयेषु गरिष्ठोऽपि रागः प्रायो विलीयते॥

श्रीरूपगोस्वामिवाक्यं,—

क्षान्तिरव्यर्थकालत्वं विरक्तिर्म्मानशून्यता ।
आशाबन्धः समुत्कण्ठा नामगाने सदा रुचिः ॥

परानुशीलनसाधनानि गौणभक्तेः प्रत्यङ्गानि दर्शयति,—

## श्रवणकीर्तनादीनि परानुशीलनोपयोगित्वात्तत्प्रत्यङ्गानि ॥३५॥

[ अतएव उपायभक्त्यङ्गस्य परानुशीलनस्य उपयोगित्वात् श्रवणकीर्त्तनादीनि तस्याः पूर्व्वोक्ताया उपायभक्तेः प्रत्यङ्गानि । "सततं कीर्त्तयन्तो मा"मित्यत्र कीर्त्तनादीनां उपासनाङ्गत्वश्रवणात् । ]

यथा भक्तिरसामृतसिन्धौ,—

शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥
आविर्भूय मनोवृत्तौ व्रजन्ती तत्स्वरूपताम् ।
स्वयं प्रकाशरूपापि भासमाना प्रकाश्यवत् ॥

शाण्डिल्यसूत्रभाष्ये धृतवचनं,—

गङ्गाजले किं न वसन्ति मत्स्या
देवालये पक्षिगणा वसन्ति ।

भावोज्झितास्ते न फलं लभन्ते
तीर्थाच्च देवायतनाच्च मुख्यात् ॥

यथा रूपगोस्वामिवाक्यं,—

यत्र रागानवाप्तत्वात्प्रवृत्तिरुपजायते ।
शासनेनैव शास्त्रस्य सा वैधाभक्तिरुच्यते ॥

तथाहि भक्तिरसामृतसिन्धौ,—

वैधभक्त्यधिकारित्वे भावाविर्भावनावधि ।
अत्र शास्त्रं तथा तर्कमनुकूलमपेक्षते ॥

भक्तिरसामृतसिन्धौ रूपगोस्वामिवाक्यं,—

हरिभक्तिविलासेऽस्या भक्तेरङ्गानि लक्षशः ।
किन्तु तानि प्रसिद्धानि निर्दिश्यन्ते यथामति ॥

पुनश्च रूपगोस्वामिवाक्यं,—

सा भक्तिरेकमुख्याङ्गाश्रिता वा बहुलाङ्गिका ।
स्ववासनानुसारेण निष्ठातः सिद्धिकृद्भवेत् ॥

यथा रसामृतसिन्धौ,—

केषाञ्चित्क्वचिदङ्गानां यत्क्षुद्रं श्रूयते फलम् ।
बहिर्मुखप्रवृत्त्यैतत्किन्तु मुख्यं फलं रतिः ॥

तथाच गीतायां भगवद्वाक्यं,—

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥

सततं कीर्त्तयन्तो मां यतन्तश्च दृढ़व्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥

पुनश्च तत्रैव श्रीमुखवाक्यं,—

अहं सर्व्वस्य प्रभवो मत्तः सर्व्वं प्रवर्त्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

महाभारते शान्तिपर्व्वणि मोक्षधर्म्मे,—

सर्व्वाश्रमाभिगमनं सर्व्वतीर्थावगाहनम् ।
न तथा फलदं सौते नारायणकथा यथा ॥

तथाच विष्णुपुराणे,—

तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने ।
न याति नरकं शुद्धं संक्षीणाखिलकल्मषः ॥

तथाहि विष्णुपुराणे, द्वितीयांशे,—

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परम् ॥

अतएव भागवते सप्तमस्कन्धे,—

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं बन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

भागवते एकादशे भगवद्वाक्यं,—

नैतत्त्वया दाम्भिकाय नास्तिकाय शठाय च ।
अशुश्रूषोरभक्ताय दुर्व्विनीताय दीयताम् ॥

भागवते तृतीयस्कन्धे कर्दमं प्रति भगवद्वाक्यं,—

कृत्वा दयाञ्च जीवेषु दत्त्वाचाभयमात्मवान् ।
मय्यात्मानं सह जगत् द्रक्ष्यस्यात्मनि चापि माम् ॥

यथा गीतायां परमेश्वरवाक्यं,—

सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्व्वत्र समदर्शनः ॥
सर्व्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्व्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥

पुनश्च तत्रैव,—

समोऽहं सर्व्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

पुनश्च तत्रैव चरमसिद्धान्ते,—

ईश्वरः सर्व्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्व्वभूतानि यन्त्रारूढ़ानि मायया ॥

तमेव शरणं गच्छ सर्व्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥

श्रीमद्भागवते तृतीयस्कन्धे एकोनविंशाध्याये कपिलदेववाक्यं,—

अहं सर्व्वेषु भूतेषु भूतात्मावस्थितः सदा।
तमवज्ञाय मां मर्त्यः कुरुतेऽर्च्चाविडम्बनम्॥
यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम्।
हित्वार्च्चां भजते मौढ्याद्भस्मन्येव जुहोति सः॥
द्विषतः परकाये मां मानिनो भिन्नदर्शिनः।
भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति॥
अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे।
नैव तुष्येऽर्च्चितोऽर्च्चायां भूतग्रामावमानिनः॥
अर्च्चादावर्च्चयेत्तावदीश्वरं मां स्वकर्म्मकृत्।
यावन्न वेद स्वहृदि सर्व्वभूतेष्ववस्थितम्॥
आत्मनश्च परस्यापि यः करोत्यन्तरोदरम्।
तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम्॥
अथ मां सर्व्वभूतेषु भूतात्मानं कृतालयम्।
अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा॥

श्रीचैतन्यचन्द्रोदयनाटके,—

अन्तः प्रसादयति शोधयतीन्द्रियाणि
मोक्षञ्च तुच्छयति किं पुनरर्थकामौ ।
सद्यः कृतार्थयति सन्निहितैकजीवा-
नानन्दसिन्धुविवरेषु निमज्जयन्ती ॥

इदानीं पूर्व्वोक्तोपाय-भक्त्यङ्गभूतस्तु प्रत्याहारस्य स्वरूपं लक्षयति,—

**देहरथं मनः सारथिमिन्द्रिय-हयामास्तिक्यज्ञानेन युक्तवैराग्येण च विषयमार्गाच्छनैर्निवर्त्तयेदेष एव प्रत्याहारः ॥३६॥**

[ अत्र देह एव रथं चेतनप्रेरितत्वात्, मनः सारथि-रूपं इन्द्रियनियन्तृत्वात् । इन्द्रियाणि हयाः शरीर-रथचालकत्वात्, "इह रथी जीव" इत्यादि सूत्रकार-स्याभिप्रेतमवगन्तव्यं, "आत्मानं रथिनं विद्धि" इत्यादि-श्रुतयः प्रमाणम् । आस्तिक्यज्ञानयुक्तवैराग्योभयविध-साधनेन पूर्व्वोक्तरथादीनामसद्विषयमार्गात्क्रमेण प्रत्या-

नयनं प्रत्याहारलक्षणं, शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया इति गीतायाम्। ]

कठोपनिषदि,—

आत्मानं रथिनं विद्धि शरीरं रथमेव च।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥

गीतायां,—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति॥
कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत्॥
सन्न्यासः कर्म्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्म्मसन्न्यासात्कर्म्मयोगो विशिष्यते॥
सन्न्यासन्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति॥

तथाहि गीतायां,—

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥
सुखमात्यन्तिकं यत्तद्‌बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥

पुनश्च तत्रैव,—

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्त्यं सुखमश्नुते ॥

उक्तञ्च भगवता गीतायां,—

योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥

पुनश्च तत्रैव,—

येषामन्तगतं पापं जनानां पुण्यकर्म्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढ़व्रताः ॥

भगवद्गीतायां अष्टमाध्याये चरमसिद्धान्ते,—

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अभ्येति तत्सर्व्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥

भागवते द्वादशस्कन्धे परीक्षितं प्रति शुकदेवस्य चरमोपदेशः,—

अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम् ।
एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ॥
दशन्तं तक्षकं पादे लेलिहानं विषाननैः ।
न द्रक्ष्यसि शरीरञ्च विश्वञ्च पृथगात्मनः ॥

गीतायां भगवानुवाच,—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

अतएवार्जुनं प्रति भगवदुपदेशः,—

अभ्यासेऽप्यसमर्थोऽसि मत्कर्म्मपरमो भव ।
मदर्थमपि कर्म्माणि कुर्व्वन् सिद्धिमवाप्स्यसि ॥
अथैतदप्यशक्तोसि कर्त्तुं मद्योगमाश्रितः ।
सर्व्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥

ननु "ज्ञानान्मोक्ष" इति श्रुतिसिद्धान्तडिण्डिमस्य जागरूकतया ज्ञाने आस्तिक्यपदं किमर्थमुपन्यस्तमित्यपेक्षायामाह श्रीसूत्रकारः,—

## ज्ञानान्मुक्तिः ज्ञानाद्बन्धश्च ॥३७॥

[ तत्र ज्ञानादास्तिक्यज्ञानादीश्वरतत्त्वज्ञाना-

दित्यर्थः। मुक्तिः बन्धनमुक्तिः ज्ञानाद्विषयज्ञानाच्छुष्कज्ञानाच्च बन्धः संसारबन्धनं भवतीत्यर्थः। "सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ" इति ज्ञानस्य बन्धकत्वं श्रीभगवतोक्तम्।]

विद्वन्मोदतरङ्गिण्यां नास्तिकस्य सिद्धान्तः,—

"अहो कुत्र कर्म, केन दृष्टं, कदा केन वा उपार्जितं? जन्मान्तरकृतमिति चेत्तदेव नास्ति प्रमाणाभावात्। सुखदुःखादिकं पुनः प्रवाहधर्म्मतया शरीरिणामनियतं, वस्तुतो जगदेतदसदिति सर्वमिदं भ्रम एव"।

तथाहि चैतन्यचन्द्रोदयनाटके रामानन्दवाक्यं,—

निर्व्वाणनिम्बफलमेव रसानभिज्ञा-
श्चुष्यन्तु नामरसतत्त्वविदो वयन्तु।
श्यामामृतं मदनमन्थरगोपरामा-
नेत्राञ्चलैश्चुलुकितावसितं पिबामः॥

तत्रैव पुनश्च के मुक्ता इति चैतन्यदेवस्य प्रश्ने श्रीरामानन्दसारग्राहिणा प्रदत्तं,—

प्रत्यासत्तिर्हरिचरणयोः सानुरागेण रागे
प्रीतिः प्रेमातिशयिनि हरेर्भक्तियोगेन योगे।
आस्था तस्य प्रणयरभसस्योपदेहेन देहे
येषां ते हि प्रकृतिसरसा हन्त मुक्ता न मुक्ताः॥

भगवद्गीतायां १८श अध्याये २०, २१, २२ श्लोकाः,—

सर्व्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

युक्तवैराग्यमिति युक्तपदोपादानेन प्रायः सूचयति,—

## वैराग्यान्मुक्तिः वैराग्याद्बन्धश्च ॥३८

[ युक्तवैराग्यमिति युक्तपदोपादानेन सूत्रकारस्यायमभिप्रायः । वैराग्यं द्विविधं युक्तवैराग्यं फल्गुवैराग्यञ्चेति। तत्र युक्तवैराग्यं नाम फलानासङ्गेन ईश्वरार्पणेन च सदाचारानुसारेण यथाविधि शौचचारित्रानुष्ठानं तस्मात् जीवानां संसारबन्धविमुक्तिः, "अनाश्रित्यः कर्म्मफलं कार्य्यं कर्म्म करोति यः । स सन्न्यासी च योगीचे"त्यादीनि बहूनि गीतावाक्यानि द्रष्टव्यानि। फल्गुवैराग्यं तु नीरसं चित्तकाठिन्यहेतुभूतं गर्व्वातिशयसम्पादकं तुच्छं मर्कटवैराग्यमिति व्यपदिशति। अतएव संसारदुःखप्रदम् । "न त्यागेनैके अमृतत्वमान"

इत्यादिश्रुतेः, "स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्", "मिथ्याचारः स उच्यते" इत्यादि गीतावचनम् । ]

तथाहि भक्तिरसामृतसिन्धौ श्रीरूपगोस्वामिवाक्यं,—

प्रापञ्चिकतया बुद्ध्या हरिसम्बन्धिवस्तुनः ।
मुमुक्षुभिः परित्यागो वैराग्यं फल्गु कथ्यते ॥

तथाच गीतायां,—

नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥
दुःखमित्येव यत्कर्म्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

तथाच भागवते एकादशे द्वादशाध्याये भगवद्वाक्यं,—

न रोधयति मां योगो न सांख्यं धर्म्म एव च ।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्त्तं न दक्षिणा ॥

तथाहि गीतायां,—

कार्य्यमित्येव यत्कर्म्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः ॥
न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः ।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥

पुनश्च तत्रैव विधीयते,—

त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥
निराशीर्यतचित्तात्मा त्यक्तसर्व्वपरिग्रहः ।
शारीरं केवलं कर्म्म कुर्व्वन्नाप्नोति किल्बिषम् ॥

अपिच,—

युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥
यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निस्पृहः सर्व्वकामेभ्यो युक्त इत्युच्यते तदा ॥

श्रीमद्भागवते प्रथमस्कन्धे द्वितीयाध्याये सूतवचनं,—

धर्म्मः स्वनुष्ठितः पुंसां विश्वक्सेनकथासु यः ।
नोत्पादयेद् यदि रतिं श्रम एव हि केवलम् ॥
धर्म्मस्य ह्यापवर्गस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्म्मैकान्तस्य कामलाभाय हि स्मृतम् ॥
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ।
जीवस्य तत्वजिज्ञासा नार्थो यश्चेह कर्म्मभिः ॥

भक्तिरसामृतसिन्धौ श्रीरूपगोस्वामिवाक्यं,—

अनासक्तस्य विषयान् यथार्हमुपयुञ्जतः ।
निर्ब्बन्धः कृष्णसम्बन्धे युक्तं वैराग्यमुच्यते ॥

नन्वेवमुक्तस्य क्रमस्य भङ्गे वैपरीत्ये च अनिष्टमेव स्यादित्याशङ्क्य सूत्रयति,

## प्रत्याहारासम्पत्तेः परभक्त्यसिद्धावपि नाधःपतनम् ॥३६॥

[ पूर्वोक्तप्रत्याहारो यद्यसम्पन्नः स्यात्तदा पराभक्तिर्न सिद्ध्यति तथापि नाधःपतनं भक्तानां भक्तेश्च कर्म्मापूर्त्तौ कर्मजड़ानामिव अधःपतनं जन्मना अवस्थया वा न्यूनत्वं न स्यात्, "नहि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छती"ति गीतावचनात् । ]

अतएव गीतावाक्यं,—

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
नहि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ॥

अतएव गीतायां कथ्यते,—

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥
यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥

तथा गीतायां,—

पूर्व्वाभ्यासेन तेनैव क्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥

श्रीरूपगोस्वामी वदति,—

कृष्णोन्मुखं स्वयं यान्ति यमाः शौचादयस्तथा ।

पुनश्च, —

सा भुक्ति-मुक्ति-कामत्वाच्छुद्धां भक्तिमकुर्व्वताम् ।
हृदये सम्भवत्येषां कथं भागवती रतिः ॥
अश्रमाभीष्टनिर्व्वाही रतिलक्षणलक्षितः ।
भोगापवर्गसौख्यांशव्यञ्जकः प्रतिविम्बकः ॥
भावोऽप्यभावमायाति कृष्णप्रेष्ठापराधतः ।
आभासताञ्च शनकैर्न्यूनजातीयतामपि ॥

## प्रत्याहारसमृद्ध्या साधनं भावस्तयैव भावात्प्रेमा ॥४०॥

[ ननु भक्तेः कीदृश उत्तरोत्तरं श्रेष्ठक्रम इत्यपेक्षायामाह,—प्रत्याहारेति । प्रत्याहारस्य समृद्ध्या अभ्यासवशेन उत्तरोत्तराधिक्येन भक्तेरुत्तरोत्तरश्रेष्ठता भवति । प्रथमतः साधनं भावः साधनात्मिका भक्तिर्भावरूपा भवति तयैव भावात्प्रेमतयैव प्रत्याहारसमृद्ध्या सहिता सती भावभक्तिप्रेमरूपा भवतीत्यर्थः । अभ्यासयोगेन ततो "मामिच्छाप्तुं धनञ्जय" इति गीतावचनं प्रमाणम् । ]

भक्तिरसामृतसिन्धौ श्रीरूपगोस्वामिवचनं,—

सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता ।
कृतिसाध्या भवेत्साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥

अतएव रूपगोस्वामिवाक्यं,—

कृष्णादिभिर्विभावाद्यैर्गतैरनुभवाध्वनि ।
प्रौढ़ानन्दचमत्कारकाष्ठामापद्यते पराम् ॥

पुनश्च,—

आदौ श्रद्धा ततः साधुसङ्गोऽथ भजनक्रिया ।
ततोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः ॥
अथासक्तिस्ततो भावस्ततः प्रेमाभ्युदञ्चति ।
साधकानामयं प्रेम्णः प्रादुर्भावे भवेत्क्रमः ॥

# सिद्धान्तप्रकरणम्

## ज्ञानसूर्य्यस्य हि रश्मयः शास्त्राणि ॥४१॥

[ ननु नानाशास्त्रेषु नानामतवादिनां नानाविध-सिद्धान्तसद्भावेन कमप्येकं सिद्धान्तमाश्रित्य तच्छास्त्राधीनतया यततां जीवानां अवश्यं श्रेयः स्यात्किमनेन तत्वसूत्रपरामर्शपरिश्रमेण इति चेन्न, स्वतःसिद्ध ज्ञानावलम्बनमृते जीवानामैकान्तिकश्रेयःसिद्धिरिति प्रतिपादयितुं पञ्चमं प्रकरणमारभते श्रीसूत्रकारः,—ज्ञानसूर्यस्य हीति। 'हि' पदं निश्चयवाचकं हेतुवाचकं वा। जीवानां स्वतःसिद्धज्ञानमेव सूर्यः, ब्रह्मस्वरूपत्वात्स्वप्रकाशत्वात् अज्ञानध्वान्तध्वंशकत्वात्सर्व्वार्थप्रकाशकत्वाच्च। तस्य रश्मयस्तदंशभूतानि तत्सम्भूतानि सर्व्वाणि शास्त्राणीत्यर्थः। "ऋचः सामानि जज्ञिरे" "छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत" इति श्रुतेः। "शास्त्रयोनित्वा"दिति ब्रह्मसूत्रकारेण व्यासेनाप्येतदेव निर्णीतम्।

नारायणं नमस्कृत्य ब्रह्माणञ्च स्वयम्भुवम्।
नारदं तत्वसारज्ञं कृष्णद्वैपायनं मुनिम्॥

मध्वाचार्य्यं ततो बन्दे तच्छिष्यान् सम्प्रदायिनः ।
कलौ यस्मिन् सम्प्रदाये साक्षाच्चैतन्यविग्रहः ॥
आविरासीन्नवद्वीपे सर्व्वसिद्धान्तसागरः ।
सारग्राहिगणा यस्य सैन्यभूता क्षितौ मताः ॥
न बाह्यं लक्षणं तेषां विना कृष्णानुशीलनम् ।
सम्प्रदायस्वपक्षत्वे सारत्यागो भवेद् ध्रुवम् ॥
सारग्राहिजनास्तस्मात्सम्प्रदायरता न हि ।
यत्सम्प्रदाये यत्सत्यं तत्सारमिति तन्मतम् ॥
तत्र तेषां प्रमोदो हि तद्धर्म्मिषु च मित्रता ।
बहुसज्जन साहाय्याद्दुःसाध्यमपि सिध्यति ॥
मिथः साररसालापो मिथश्चानन्दकारणम् ।
सर्व्वेषां सम्प्रदायानामेतद्धै फलमद्भुतम् ॥
तस्माच्छ्रीगौरदासानां माध्वीय जनसंग्रहः ।
तत्रापि बहवः सन्ति बाह्यचिह्नावलम्बिनः ॥
सम्प्रदायानुरोधाद्वा तत्तत्त्वाज्ञानतोऽपि वा ।
केचित्तच्चिह्नशून्याश्च सारग्राहितया मता ॥
लाभपूर्णा दोषमुक्ताः सञ्चरन्त्यवधूतवत् ।
तेषां विशुद्धबुद्धिनां कृष्णतत्त्वविवेकीनाम् ।
नमामि चरणाम्भोजं युक्तवैराग्यधारिणाम् ॥ ]

यथा मुण्डकोपनिषदि,—

द्वे विद्ये वेदितव्य इति हस्म यद्ब्रह्म-
विदो वदन्ति परा चैवापरा च।
तत्रापरा ऋग्वेदो यजुर्व्वेदः
सामवेदोऽथर्व्ववेदः॥
शिक्षाकल्पो व्याकरणं निरुक्तं छन्दोज्योतिषमिति।
अथ परा यया तदक्षरमधिगम्यते॥

तथाहि एकादशस्कन्धे भगवद्वाक्यं,—

कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता।
मयादौ ब्रह्मणे प्रोक्ता धर्म्मो यस्यां मदात्मकः॥
तेन प्रोक्ता स्वपुत्राय मनवे पूर्व्वजाय सा।
ततो भृग्वादयोगृह्णन् सप्तब्रह्ममहर्षयः॥
तेभ्यः पितृभ्यस्तत्पुत्रा देव-दानव-गुह्यकाः।
मनुष्याः सिद्धगन्धर्वाः स विद्याधरचारणाः॥
किं देवाः किन्नरा नागा रक्षः किंपुरुषादयः।
बह्वयस्तेषां प्रकृतयो रजःसत्वतमोभुवः॥
याभिर्भूतानि भिद्यन्ते भूतानां पतयस्तथा।
यथा प्रकृति सर्व्वेषां चित्रावाचः स्रवन्ति हि॥
एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम्।
पारम्पर्य्येण केषाञ्चित्पाषण्डमतयोऽपरे॥

तथाच,—

अणुभ्यश्च बृहद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ।
सर्व्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥

कठोपनिषदि,—

अविद्यायामन्तरे वर्त्तमानाः
स्वयं धीरा पण्डितं मन्यमानाः ।
दंद्रम्यमानाः परियन्ति मूढ़ा
अन्धेनैव नीयमाना यथान्धाः ॥

भागवते,—

"संग्रहोऽयं विभूतीनां त्वमेतत् विपुली कुरु ।"

अतएव योगवाशिष्ठग्रन्थे तृतीयसर्गे भरद्वाजं प्रति

भरद्वाजं प्रति बाल्मीकिवाक्यं,—

दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
संपन्नं चेत्तदुत्पन्ना परानिर्व्वाण निर्वृतिः ॥

श्रीमदानन्दबोधेन्द्र सरस्वती कृत अस्य श्लोकस्य टीका "नताबदन्यः चिद्व्यतिरिक्तस्य जड़तया च अनुभवत्वायोगात् । आत्मैव चेत्स पूर्व्वमेवासीदिति किं शास्त्रेण इत्याशङ्क्याह,—दृश्यमिति । सत्यमात्मैवानुभवः तथाप्यसौदृश्य सह कृतो न तदनुभवः, किन्तु

मनसो वृत्तिरूपेणात्मतत्त्वसाक्षात्कार-बोधेनाविद्या-नाशात्तदुपानकदृश्यमार्जनं दृश्यां कालत्रयोऽपि नास्तीत्येव रूपं सम्पन्नं चेन्नित्यसिद्धात्मरूपापि परानिर्व्वाण-निर्वृतिस्तस्मात्तत्त्वज्ञानादुत्पन्नेव भवतीति केवलस्तद्-द्वारा स्वरूपभूतोऽप्यनुभवः शास्त्रफलमित्यर्थः ॥

पुनश्च तत्रैव,—

अन्यथा शास्त्रगर्त्तेषु लुठतां भवतामिह ।
भवत्यकृत्रिमाज्ञानं कलैरपि न निर्वृतिः ॥

## शास्त्रमक्षमेषु बलीयो विवेकिनां नैतत्तन्मूल प्राप्तेः ॥४२॥

[ ननु "यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः। न स सिद्धिमवाप्नोति न सुखं न परां गति"मिति गीतावचनप्रामाण्येन शासनाच्छास्त्रमिति व्युत्पत्त्या जीवानां प्रवृत्तेः शास्त्रीयनियमाधीनत्वात्कथं शास्त्र-विधिं विना श्रेयः स्यादित्यपेक्षायामाह,—शास्त्रमक्ष-मेष्विति। अक्षमेषु स्वतःसिद्धज्ञानोदयहीनेषु अतएव विधिरचनायां स्वयं असमर्थेषु जीवेषु शास्त्रं बलीयं बलवत्तरं नियामकम्। विवेकिनां स्वतःसिद्धज्ञान-सम्पन्नानामतएव तत्तत्श्रेयस्करविधिरचनायां स्वयं

सामर्थ्यविशिष्टानां नैतत्। एतच्छास्त्रं न नियामकं न शासनसमर्थं तन्मूलप्राप्तेः। तेषां शास्त्राणां मूलभूतस्य स्वतःसिद्धज्ञानस्य प्राप्तत्वात्। एतदेव सर्वाणि शास्त्राणि अविद्यावद्विषयकानीति शारीरकमीमांसाभाष्ये स्पष्टीकृतं, यत्तु "यः शास्त्रविधिमुत्सृज्ये"ति भगवद्वचनं तत्स्वश्रेयः ज्ञानशून्यानां स्वच्छन्दतया निषिद्धकर्म्मासक्तानां शास्त्रीयविध्यधीनतया नियमानुरूपप्रवृत्त्यर्थमिति द्रष्टव्यं, शास्त्रमपि अशासितजीवानां शासनार्थमित्यवधेयं अन्यथा "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति। तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्यच। त्रैगुण्य विषयावेदा निस्त्रैगुण्यो भवार्जुन"। इत्यादिषु भगवच्छिक्षायाः वैफल्यापत्तेः। अलमतिविस्तरेण।]

यथा गीतायां षोड़शाध्याये भगवद्वचनं,—

यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
तस्माच्छास्त्रं प्रमाणन्ते कार्य्याकार्य्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म्मकर्त्तुमिहार्हसि॥

तथाच मनुसंहितायां द्वादशाध्याये,—

विभर्त्ति सर्व्वभूतानि वेदशास्त्रं सनातनम्।
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम्॥

भगवन्तं पृच्छति अर्जुनः,—

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥

उक्तञ्च भगवता,—

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

तथा चाह मनुः,—

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥

तथाहि भागवते एकादशस्कन्धे भगवद्वाक्यं,—

फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् ।
श्रेयो विवक्षया प्रोक्ता यथा भैषज्यरोचनम् ॥

एकादशस्कन्धे भगवद्वचनं यथा,—

शुद्धाशुद्धी विधीयेते समानेष्वपि वस्तुषु ।
द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥
धर्म्मार्थं व्यवहारार्थं यात्रार्थमिति चानघ ।
दर्शितोऽयं मयाचारो धर्म्ममुद्वहतां धुरम् ॥
देशकालादिभावानां वस्तुनां मम सत्तम ।
गुणदोषौ विधीयेत नियमार्थं हि कर्म्मणाम् ॥

तथाहि रहस्यसिद्धान्ते,—

प्रवृत्तं कर्म्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेव्यमानस्तु भूतान्यत्येति पञ्च वै ॥ १ ॥
सर्व्वभूतेषु चात्मानं सर्व्वभूतानि चात्मनि ।
समः पश्यन्नात्मयाजी स्वराज्यमधिगच्छति ॥ २ ॥
यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥३॥
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ॥ ४ ॥

तथाहि महाभारते,—

पुराणं मानवो धर्म्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

तथाच भगवद्वाक्यं,—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥

## भक्ते न शास्त्रं तद्विधेर्ज्ञानाविरोधित्वात् ॥४३॥

[ ज्ञानिसामान्ये शास्त्रस्यानियामकतामुक्त्वा भक्त-

पक्षे विशेषमाह,—भक्ते न शास्त्रं भक्ते अन्तःशुद्धिर्ज्ञानवैराग्यविशिष्टतया भक्त्यधिकारिणि जीवे शास्त्रं कर्म्मविधिप्रतिपादकं न नियामकं तद्विधेः तेन भक्तेन कृतस्य परानुशीलनादिविधेर्ज्ञानविरोधित्वाभावात् । अत्रायमभिप्रायः, स्वकृत परानुशीलनादिविधिना स्वस्य कृतार्थत्वान्न परकृतविधिप्रापकशास्त्रापेक्षा भक्तस्येति । "किमहं पुण्यं नाकरवं किमहं पापमकरवं तत्र कः शोषकः को मोहः" इति श्रुतेः । "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गताऽसि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च" इति गीतावचनम् । ]

भक्तिरसामृतसिन्धौ,—

नात्र शास्त्रं न युक्तिश्च तल्लोभोत्पत्तिलक्षणम् ।
वैधभक्त्यधिकारि तु भावाविर्भावनावधि ।
अत्र शास्त्रं तथा तर्कमनकूलमपेक्षते ॥

यथा मनुसंहितायां, १० अध्याये,—

अहिंसा सत्यमस्त्येयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्मं चातुर्वर्णोऽब्रवीन्मनुः ॥

अतएव मनुः,—

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्प्यते ॥

अपिच,—

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्म्मः स्यादशङ्कितः ॥

पुनश्च,—

एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः ।
स विज्ञेयः परो धर्म्मो नाज्ञानामुदितोऽयुतैः ॥
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥

# भक्तौ न वर्णाश्रमविधिः स तस्याज्ञानपरत्वात् ॥४४॥

[ भक्तैर्वर्णाश्रमधर्म्म आचरणीयो नवेति संशयं निराकरोति । भक्तौ न वर्णाश्रमविधिः प्राकृता वैध-भक्ता विधिमाचरन्तु नाम, किन्तु अप्राकृत-निर्गुण-तुरीय-भक्तौ सम्पन्नायां वर्णाश्रमविधिर्नाचरणीयो नादरणीयश्च, यतः तस्याः शुद्धभक्तेर्ज्ञानान्तरजायमानत्वं "ज्ञानवान् मां प्रपद्यते" "तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत" इत्यादौ श्रीभगवता निर्द्धारितः । अत्र ज्ञाने सति कर्म्मत्यागः सर्व्वत्र सिद्धान्तितोऽस्ति । किमुत तदु-

तत्कालीन परमभक्तौ जातायामिति कैमुतिकन्यायोऽपि सूत्रकारेण संसूचितः। "ज्ञाननिष्ठविरक्तो वा मद्भक्तो वानपेक्षकः। स्वलिङ्गानाश्रमांस्त्यक्त्वा चरेद्विधिगोचरः"॥ "सर्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज" इत्यादौ भगवदुपदेशोऽपि तथाविधः। न च तत्र धर्म्मत्यागेन पातित्यशङ्का "अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुच" इति तत्रैव सत्यप्रतिज्ञस्य श्रीभगवतः प्रतिज्ञा दार्ढ्यात्॥ ]

तथाहि मनुः,—

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥

प्रजानां रक्षणं दानमिज्याध्यायनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥

पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च॥

एकमेव तु शूद्रस्य प्रभुः कर्म्मसमादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥

लोकानान्तु विवृद्ध्यर्थं मुख-बाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्॥

उक्तञ्च भगवता गीतायां,—

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप ।
कर्म्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् ॥
शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रकर्मस्वभावजम् ॥
कृषि-गोरक्ष-वाणिज्यं वैश्यकर्मस्वभावजम् ।
परिचर्य्यात्मकं कर्म्म शूद्रस्यापि स्वभावजम् ॥

यथा गीतायां,—

श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्व्वन्नाप्नोति किल्विषम् ॥
तत्र तं बुद्धिसंयोगं लभते पौर्व्वदैहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥
पूर्व्वाभ्यासेन तेनैव क्रियते ह्यवशोऽपि सः ॥

तथाहि महाभारते शान्तिपर्वणि दानधर्मे सदाशिव वाक्यं,—

ब्रह्मस्वभावः सुश्रोणि समसर्व्वत्र मे मतिः ।
निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः ॥

कर्म्मभिः शुचिभिर्देवि विशुद्धात्मा जितेन्द्रियः।
शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्माब्रवीत्स्वयम् ॥
स्वभावं कर्म्म च शुभं यत्र शूद्रेऽपि तिष्ठति।
विशिष्टः स द्विजातेर्वै विज्ञेय इति मे मतिः ॥
न योनिर्नापि संस्कारो न श्रुतं न च सन्ततिः।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥
ज्यायांसमपि शीलेन विहीनं नैव पूज्यते।
अपि शूद्रश्च धर्मज्ञं यद्वृत्तमपि पूजयेत् ॥

तथाहि श्रीमन्मनुः,—

जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः।
कुर्य्यादन्यान्नवा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥
चातुर्वर्ण्यं त्रयो लोकाश्चाश्रमश्च पृथक् पृथक्।
भूतं भव्यं भविष्यश्च सर्व्वं वेदात्प्रसिध्यति ॥

भगवद्गीतायां,—

त्रैगुण्यविषया वेदाः निस्त्रैगुण्यो भवार्जुन ॥

तथाच श्रीमद्भागवते सप्तमस्कन्धे एकादशाध्याये युधिष्ठिरं प्रति सारग्राहिणो नारदस्य वचनं,—

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्।
यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥

तथाच मनुः,—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

तथाहि गीतायां,—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ॥

यथा ब्रह्मसूत्रे प्रथमाध्याये तृतीयपादे,—

शुचास्य तदनादरश्रवणात्तदा द्रवणात्सूच्यते हि ।

तथा छान्दोग्ये जानश्रुतिर्हि पौत्रायण इत्यादि ॥

अतः व्यासस्य सूत्रमिदं दृश्यते,—

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ।

ततश्चेदं सूत्रं,—

संस्कारा परामर्शात्तदभावाभिलापाच्च ।

तदभाव निर्द्धारणे च प्रवृत्तेः ।

छान्दोग्ये,—

नाहमेतद् वेद भो यद्गोत्रोऽहमस्मीति ।

## अज्ञाहितार्थं ग्राह्यं कर्म्म न विरोधि ॥४५॥

[ ननु किं भक्तैः सर्व्वथैव कर्मत्याज्यमित्याशङ्कायां कर्म्मणि हेयोपादेयांश विभागं विधत्ते श्रीसूत्रकारः

अज्ञहितार्थमिति। अज्ञानां अज्ञानमलिनसत्वानां अतएव ज्ञानभक्त्यनधिकारिणां हितार्थं विहितकर्म्मसु अश्रद्धानिवृत्त्यर्थं वर्णाश्रमादिविहितं नित्यं नैमित्तिकाख्यं कर्म्म किञ्चिदुग्राह्यं करुणया कर्त्तव्यमित्यर्थः अन्यथा "यद्‌यदाचरति श्रेष्ठ"—इति न्यायेन कर्म्मत्यागं परमार्थाप्राप्तिश्च उभयविभ्रंशेन तेषां सर्व्वार्थनाशः स्यात्। अतएव लोकसंग्रहमेवापि सम्पश्यन् कर्त्तुमर्हसीति श्रीभगवदाज्ञापि तथाविधैव किन्तु न विरोधि। भक्तिविरोधिचित्तविक्षेपफलबन्धनं परद्वेषादि दोषजनकं काम्यनिषिद्धादिकं कर्म्म न कर्त्तव्यमित्यर्थः। 'यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः। कर्षयन्तः शरीरस्थं भूतग्राममचेतसः। माञ्चैवान्तःशरीरस्थं तान् विद्धयासुर निश्चया'निति गीतोक्तेः। ]

यथा गीतायां,—

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्म्मकृत्।
कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः॥

कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥
नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः ।
तदर्थं कर्म्म कौन्तेय मूक्तसङ्गः समाचर ॥

तथा च गीतायां,—

कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्त्तुमर्हसि ॥
यद्‌यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्म्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥

## यथाधिकारमवस्थितिर्नोपर्य्यधस्त्वात् ॥४६॥

[ ननु यदि कर्म्मानुष्ठानात्कर्म्मत्यागः श्रेयान् तर्हि अज्ञा अपि कर्म्मत्यागेन कृतार्था भवेयुः किं कर्म्माचरणेन इत्याशङ्कायामाह,—यथाधिकारमवस्थितिरिति । जीवानां स्वस्वाधिकारानुरूपानुरूपा अवस्थितिरुचिता न तु उपरि नाधस्त्वात्स्वधर्म्मादुत्कृष्टं निकृष्टं वा नाचर-

णीयमित्यर्थः। 'स्वे स्वेऽधिकारे या निष्ठा सगुणः परिकीर्त्तितः। विपर्य्ययस्तु दोषः स्यादुभयोरेष निश्चयः। स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः'। इति भगवद्वाक्यम्। ]

यथा भागवते एकादशे भगवदुक्तिः,—

भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम्।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात्॥

पुनश्च तत्रैव,—

स्वे स्वेऽधिकारे या निष्ठा सगुणः परिकीर्त्तितः।
विपर्य्ययस्तु दोषः स्यादुभयोरेष निर्णयः॥
नष्टमोहः स्मृतिर्लब्ध्वा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥
नमोऽस्तु ते महायोगिन् प्रपन्नमनुशाधि माम्।
यथा त्वच्चरणाम्भोजे रतिः स्यादनपायिनी॥

तथोच्यते मनुना,—

यं वदन्ति तमोभूता मूर्खाधर्म्ममतद्विदः।
तत्पापं शतधा भूत्वा तद्वक्तॄननुगच्छति॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात्स्वनुष्ठितात्।
स्वधर्म्मे निधनं श्रेय परधर्म्मो भयावहः॥

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्य्यो नास्तिको वेदनिन्दकः ॥
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

भागवते तृतीयस्कन्धे,—

जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ।
ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ।
तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः ॥
रूपभेदविदस्तत्र ततश्चोभयतोदतः ।
तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥
ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥
अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वधर्म्मकृत् ।
मुक्तसङ्गस्ततो भूयानदोग्धा धर्म्ममात्मनः ॥
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः ।
मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्म्मणः ॥
न पश्यामि परं भूतमकर्त्तुः समदर्शनात् ।
मनसैतानि भूतानि प्रणमेद्बहु मानयन् ॥

गीतायांच,—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥

## काम्येतरभक्तिर्न शस्ता चित्त-विक्षेपत्वादनित्यफलत्वाच्च ॥४७॥

[ ननु कर्म्ममार्गेऽपि पितृदेवाद्युपासनस्यापि बहुविधश्रेयःसम्पादकत्वात्कथं सर्व्वथैव कर्म्मणोऽश्रेयस्त्वमुच्यते इत्याशङ्कायामाह काम्य इति। काम्या कामफलनिमित्तका इतरभक्तिः परमेश्वरादितरेषु जीवकोट्यन्तर्गतेषु भक्तिर्भगवद्भक्तानां न प्रशस्ता, चित्तविक्षेपत्वाद् बहुविधदेवताकाण्डश्रुतिस्मृतिपर्य्यालोचनया तत्तत्पितृदेवादीनां तत्तद्विधिनियमानुसारेण यजनपूजनात्मकगुरुतरनानाकर्म्मानुष्ठानेन चित्तविक्षेपकारणत्वात् बहुवित्तव्ययायासं राजसं कर्म्म तन्यते। 'बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिना'मिति गीतावाक्यात्। अनित्यफलत्वाच्च कृषिवाणिज्यादिवत् अल्पकालोपभोग्यसुखप्रदत्वात् ऐहिकधनपुत्रादिपारलौकिकपितृदेवलोकादिविनश्वरफलप्रदत्वात् इति भावः। अग्निष्टोमेन स्वर्गकामो यजेत। तद् यथेह

कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इत्यादि श्रुतेः। 'यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः। भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥' इति स्मृतेः। ]

अतएव गीतोपनिषदि,—

अनन्यश्चिन्तयन्तो मां ये जनाः पर्य्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् ॥

अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥

गीतायां,—

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्य. सम्यग्व्यवसितो हि सः ॥

रूपगोस्वामिना उक्तं,—

शास्त्रतः श्रूयते भक्तौ नृमात्रस्याधिकारिता।

भक्तिरसामृतसिन्धौ,—

ब्रह्मानन्दो भवेदेष चेत्परार्द्ध गुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥

तथाच तन्त्रे,—

ज्ञानतः सुलभा मुक्तिर्भुक्तिर्यज्ञादिपुण्यतः ।
सेयं साधनसाहस्रैर्हरिभक्तिः सुदुर्लभा ॥

## प्रत्यक्षानुमानाभ्यां भागवत-सिद्धान्त एव गरीयान्, विज्ञानमय-त्वात्सर्वसिद्धान्ताश्रयत्वाच्च ॥४८॥

[ नन्वस्मिन् सिद्धान्तप्रकरणे को वा सिद्धान्तः श्रेष्ठतया विचारित इत्यपेक्षायामाह प्रत्यक्षानुमानाभ्या-मिति । सर्व्वार्थनिर्णयमूलभूतप्रमाणाभ्यां प्रत्यक्षानु-मानाभ्यां भागवतसिद्धान्त एव सर्व्वसिद्धान्तेभ्यो गरीयानित्यवगम्यते । तत्र भागवतसिद्धान्तो नाम भगवता महाभारते अर्जुनं प्रति श्रीमद्भागवते एकादश-स्कन्धे उद्धवं प्रति चतुःश्लोक्या ब्रह्माणं प्रति उपदिष्टो यः सिद्धान्तः स एव भागवतशास्त्रस्य जन्माद्यस्य यत इत्युपक्रम्य सत्यं परं धीमहीत्युपसंहारेण नानोपाख्यान-प्रश्नोत्तरादिभिर्निर्द्धारितः । सोऽपि भागवतानां भग-

वद्भक्तानां स्वतःसिद्धप्रत्ययेन निश्चितसिद्धान्तः गरीयान् गुरुतरः। कर्म्मज्ञानादिवादिनां सिद्धान्तेभ्यः श्रेष्ठतर इत्यर्थः विज्ञानमयत्वाद्विशुद्धज्ञानमयत्वात्सर्वसिद्धान्ताश्रयत्वाच्च सर्व्वस्मिन् देशे सर्व्वेषामप्राकृतबुद्धिविवेकशालिनां महाजनानां सर्व्वस्मिन् काले भूता भवन्ति च भाविनो वा ये सिद्धान्तास्तदाश्रयत्वात् तन्मूलभूतत्वात् भागवतसिद्धान्तस्य सर्व्वतः श्रेष्ठत्वमिति भावः। अतएव ददामि बुद्धियोगं तं येन मां उपयान्ति ते इति श्रीभगवतोक्तम्। सर्व्ववेदान्तसारं तत् श्रीभागवतमिष्यते। तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचिदिति पुराणान्तरात्।]

यथा मनु,—

प्रत्यक्षञ्चानुमानञ्च शास्त्रञ्च त्रिविधागमम्।
त्रयं सुविदितं कार्य्यं धर्म्मशुद्धिमभीप्सता॥

यथा भागवते एकादशे सप्तमाध्याये भगवदुपदेशः,—

आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः।
यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते॥

गीतायां,—

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥

## चैतन्यस्य सर्व्वाचार्य्यस्याविर्भावे न गुर्व्वन्तरम् ॥४९॥

[ ननु तादृशभागवतसिद्धान्तज्ञानं गुरूपसत्तिं विना कथमुपपद्येत इत्यपेक्षायामाह चैतन्यस्येति। सर्व्वेषां तत्त्वज्ञानाधिकारिणां सारग्राहिणां वैष्णवानामाचार्य्यस्य श्रीचैतन्यस्य भगवतः आविर्भावे सति तत्प्रकाशानन्तरमित्यर्थः न गुर्व्वन्तरं इतरो गुरुर्न ग्राह्यः नोपासितव्य इत्यर्थः। यो ब्रह्माणं विदधाति पूर्व्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः। तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता। आचार्य्यं मां विजानीयात् इत्यादि स्मृतेश्च। ]

गुरुमाहात्म्ये नारदपञ्चरात्रोक्तिर्यथा,—

गुरुश्च ज्ञानोद्गीरणात् ज्ञानं स्यान्मन्त्रतन्त्रयोः।
तत्तन्त्रं स च मन्त्रश्च कृष्णभक्तिर्यतो भवेत् ॥

सहस्रदलपद्मञ्च सर्व्वेषां मस्तके मुने।
तत्रैव तिष्ठति गुरुः सूक्ष्मरूपेण सन्ततम् ॥

हरिभक्तिविलासे,—

कृपया कृष्णदेवस्य तद्भक्तजनसङ्गतः ।

भक्तेर्माहात्म्यमाकर्ण्य तामिच्छन् सद्‌गुरुं भजेत् ॥

एकादशस्कन्धे चोक्तं भगवता,—

नृदेहमाद्यं सुलभं सुदुर्लभं

प्लवं सुकल्पं गुरुकर्णधारम् ।

मयानुकूलेन नभस्वतेरितं

पुमान् भवाब्धिं न तरेत्स आत्महा ॥

तत्रैव योगेश्वरवाक्यं,—

तस्माद्‌गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।

शाब्दे परे च निष्णातं ब्रह्मण्युपसमाश्रयम् ॥

श्रुतौ च,—

तद्विज्ञानार्थं सद्‌गुरुमेवाभिगच्छेत्समित्पाणिः

श्रोत्रियं ब्रह्मनिष्ठम् । आचार्य्यवान् पुरुषो वेद ॥

भगवदुक्ति एकादशे च,—

दुःखोदर्केषु कामेषु जातनिर्व्वेद आत्मवान् ।

अजिज्ञासितमद्धर्म्मो गुरुं मुनिमुपाव्रजेत् ॥

तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ।

यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥

मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत् ।

ज्ञानलुब्धो तथा देही गुरोर्गुर्व्वन्तरं व्रजेत् ॥

पुनश्च भागवते चतुःश्लोकी मध्ये,—

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्व्वत्र सर्व्वदा ॥

स्वाधीनतायाः प्रकारं व्यनक्ति, पश्य,—

ब्रह्मानन्दश्च भित्वा विलसति शिखरं यस्य यत्रात्तनीड़ं
राधाकृष्णाख्यलीलामयखगमिथुनं भिन्नभावेन हीनम् ।
यस्य च्छाया भवाब्धिश्रमशमनकरी भक्तसङ्कल्पसिद्धे-
र्हेतुश्चैतन्यकल्पद्रुम इह भुवने कश्चन प्रादुरासीत् ॥

## परे पूर्णानुरक्तिरितरेषु तुल्या जड़े युक्त-वैराग्यश्चेति सारग्राहि-मतम् ॥५०॥

[ सिद्धान्तप्रकरणस्य सारं स्पष्टीकरोति परे इति। परे परमेश्वरे पूर्णा अखण्डिताऽव्यवधानानन्दमयी अनुरक्तिर्जीवस्य स्वाभाविकी वृत्तिः स्वहृदये प्रकटनीये-त्यर्थः । इतरेषु परमेश्वरभिन्नेषु चिद्रूपेषु जीवेषु तुल्या तत्तदवस्थजीवानुरूपा अनुरक्तिः, अयं अर्थः मति-वैषम्यादुत्कृष्ट-मध्यम-निकृष्टतया त्रैविध्येन प्रतीयमानेषु तेषु यथाक्रमं गौरवमैत्रीकरुणारूपा त्रिविधा अनुरक्तिः

कर्त्तव्या। अविषममतिनान्तु तथा प्रतीत्यभावेन तेषु क्रमेणैव अमत्सरा विवादानवज्ञारूपा वा अनुरक्तिः किंवा सर्व्वजीवानामीश्वराविर्भूतत्वात्सर्व्वेष्वपि भ्रातृस्नेहात्मिका वा कर्त्तव्येत्यर्थः। जड़े अचित्पदार्थे वित्तापत्यकलत्रमित्रगृहक्षेत्रादिषु प्रियतरप्रतीयमानेषु तेषु तेषु जड़वस्तुषु युक्तवैराग्यं यथोपयुक्तस्वीकारव्यवहारादिरूपं सम्पादनीयमित्यर्थः। इति सारग्राहिणां तत्तत्साम्प्रदायिकविवादवर्जितानां वैष्णववर्य्याणां मतमित्यलमतिविस्तरेण। अत्र प्रमाणानि बहूनि श्रुतिस्मृतिरूपाणि तत्तत्प्रकरणेषु पूर्व्वोक्तानि द्रष्टव्यानि। इति तत्वसूत्रविवरणं समाप्तम्।

हारीतान्वय सम्भूतो गोपीनाथाभिधः कृती।
विवृतिं तत्वसूत्राणां चकार विदुषां मुदे॥
जगन्नाथक्षेत्रवासी मुक्तिमण्डपपण्डितः।
जगन्नाथप्रसादेन तत्वव्याख्यामचीकरत्॥
ग्रन्थगौरवभीत्या च संक्षिप्तं विवृतं मया।
विस्तारयन्तु सुधीयो बहुव्याख्यानयुक्तिभिः॥ ]

इति तत्वसूत्रं सम्पूर्णम्।

कलिकातानगर्यां २४३।२ संख्यक अपार सार्किउलार
रोड्स्थित गौड़ीय प्रिण्टिं वैद्यु तिकमुद्रायन्त्रे
श्रीअनन्तवासुदेव ब्रह्मचारिणा मुद्रितम्